MUKTA DHĀRĀ-VĀRTĀGṚHAM

Sanskrit rendering of Tagore's drama

By

Dr. Dhyanesh Narayan Chakrabarti

मुक्तधारा-वार्तागृहम्

रवीन्द्रनाटकस्य संस्कृतानुकल्पनम्

डः ध्यानेश नारायण चक्रवर्तिना

মুক্তধারা-বার্তাগৃহম্

রবীন্দ্রনাটকের সংস্কৃতানুবাদ

ডঃ ধ্যানেশ নারায়ণ চক্রবর্তী

রবীন্দ্রজয়ন্তী

১৯৮৮

मुक्तधारा-वार्तागृहम्

कविगुरु-रवीन्द्रनाथविरचित-वङ्गभाषात्मक-नाटकस्य संस्कृतानुकल्पनम्

अनुकल्पकः

आचार्यः-डः श्रीध्यानेश-नारायण-चक्रवर्ती, एम्-ए, पि-एइच्-डि,
शास्त्री, वाणीकण्ठः भक्तिरत्नः, वाचस्पतिः, प्रज्ञाभारती

कलिकाता-रवीन्द्रभारती-विश्वविद्यालये संस्कृतविभागस्य
रवीन्द्रसाहित्यस्य च प्राध्यापकः ;
श्रीश्रीसीतारामदासोंकारनाथ-संस्कृत-प्रज्ञा-महाविहारस्य कुलपतिः

MUKTA DHĀRĀ—VĀRTĀGṚHAM

Sanskrit rendering of the Bengali dramas of the Great Poet Tagore

By

Dr. Dhyanesh Narayan Chakrabarti

M.A., Ph.D, ŚĀSTRĪ, Vāṇikaṇṭha, Bhaktiratna, Vācaspati, Prajñābhāratī
Calcutta University Gangamani Medalist.

Senior Reader, Sanskritic Studies & Rabindra Literature,
Rabindra Bharati University, Calcutta ;
Cultural Secretary, Sanskrit Sahitya Parisat, Calcutta.

Director, Sri Sri Sitaramadasa Omkaranatha
Saṃskṛta Prajñāmahāvihāra,
Calcutta.

CALCUTTA

1988.

निबन्धकेन डः रमेशचन्द्र मित्रेण
रवीन्द्रभारती विश्वविद्यालयात् प्रकाशितोऽयं ग्रन्थः

Published by

Dr. Ramesh Chandra Mitra
Registrar,
Rabindra Bharati University
56/A—B. T. Road
Calcutta-700 050
West Bengal.
INDIA

मूल्यम्—६०·००

Price—60·00

प्राप्तिस्थानम्
जिज्ञासा
१/१, कलेज रो
कलिकाता—९
१३३, रासविहारी एभेन्यु
कलिकाता—२९

फिरमा के एल् एम् (प्राइभेट) लिः
२बि, बि. बि गाङ्गली ष्ट्रीट
कलिकाता—१२

Can be had from :
JIJNĀSĀ
1/1 College Row
Calcutta-9.
133, Rashbehari Avenue,
Calcutta-29.

Firma KLM (Private) Ltd.
2B, B. B. Ganguli Street,
Calcutta-12

Printed by
Modern Printers
12, Ultadanga Main Road,
Calcutta-67.

रवीन्द्रप्रशस्तिः

ज्योतिर्जित्वरमुत्सृजञ्जगदिदं कर्मण्यभिप्रेरयन्
जाड्यं जर्जरयंस्तमांसि तिरयन् सर्वं समुद्दीपयन् ।
पाप्मानं विनिपातयन् प्रतिपदं भद्रं समुद्भासयन्
भूयादभ्युदयो रवेरविरतं विश्वस्य भव्यं वहन् ॥

भेदो यस्य न वस्तुतोऽस्ति भुवने प्राची प्रतीचीति वा
मित्रत्वं प्रकटीकृतञ्च सततं येनात्मनः कर्मणा ।
विश्वं यस्य पदं प्रसिद्धमनिशं सत्ये च यस्य स्थितिर्-
भूयात्तस्य जयो रवेरविरतं तेनास्तु तृप्तं जगत् ॥

पञ्चत्रिंशदुत्तरत्रयोदश-वङ्गाब्दीयसौरवैशाखस्य पञ्चविंशदिवसे
रवीन्द्रजन्मोत्सवमुपलक्ष्य विश्वभारतीसम्मिलनीपक्षतो
मुद्रितं प्रकाशितञ्च श्लोकद्वयम् ।

कविसार्वभौमस्यान्तिम-जन्मोत्सवे गृहीतं चित्रम्

PRELUDE

At last by the grace of The Almighty, Tagore's drama in the garb of Sanskrit has been published again. On the occassion of Tagore-centenary, this humble self translated in Sanskrit two play-lets of Tagore along with some other works which were highly appreciated by the scholars, press and public. These plays, presented on stage and broadcast over, elated the audience in the country and abroad. As the works are now not available The Ravindra Bharati University, with which I am connected since the inception, has now published the same in response to the request from various quarters.

My first love is Sanskrit along with the works of Tagore, the great poet which led me to this noble task. I cannot but express my gratitude to all the scholars who warmly received the first publication with their good wishes and favourable opinions, some of which are annexed. Both the past and present Vice-Chancellors of mine, Prof. Dr. Ramaranjan Mukhopadhyaya and Prof. Dr. Bhavatosh Chattopadhyaya, who are connoisseurs of scholarship, blest this publication with their valuable preface and fore-word for which I am grateful to them. I am also grateful to Prof. Dr. Krishnanath Chattopadhyaya, my senior in the academic fraternity and Dean of the faculty of Arts, Dr. Ramesh Chandra Mitra, Registrar of the University and Sm. Sivani Chattopadhyaya, the able Superintendent of Publication and Sri Gaur Pal of Modern Printers for their sincere co-operation. Prof. Siddhesvar Chattopadhyaya, retired Head of the Deptt. of Sanskrit and Prof. Dr. Pratap Vandyopadhyaya of the University of Burdwan kindly went through the manuscript, whose suggestions adore the edition for which I remain indebted to them. Sm. Usha Devi Chakrabarti M.A.B.T., my wife, and Sri Nirmalyanarayan Chakrabarti Darshan

Shāstrī, M.A., Cert-in-German & French, my only issue, constantly kept me fit for this effort.

With tears I remember the encouragement of Kaviśekhara Viśveśvara Vidyābhūṣaṇa and Mahāmāyā Devī, my late lamented parents and Late Saumyendra Nath Tagore, the renowned cultural and political leader and one of my best well-wishers in this task who are no more in this mortal world to witness the 2nd edition. With grave grief I remember late Prof. Dr. Gopikamohan Bhattacharya and late Prof. Sm. Nandini Sadhu who made a very appreciative presentation of the plays by their efficient and attractive role. It is my solemn duty to remember late Sm. Madhuri Mukhopadhyaya Sura-Sarasvati, the consort of Ācārya Dr. Govindagopala Mukhopadhyaya, who used to keep the audience spell-bound by her divine tune to the songs of Tagore, translated by the humble self in the divine language. I acknowledge my sincere gratitude to all the participants on stage and Radio on various occasions and to the appreciators ranging from late Dr. S. Radhakrishnan, the President of India to my students past and present. It may not be irrelevant to remember that more than hundred times these plays in Sanskrit were staged and broadcast over with grand success and greeted with applause. I simply pray—"Let these plays of Tagore in Sanskrit shine at home and abroad for the pleasure of the readers imbibed with aesthetic sense.

रसिकानां विनोदार्थं
रवीन्द्रनाटकद्वयम् ।
संस्कृतेन विराजतां
गेहे विश्वे निरन्तरम् ॥

Dhyanesh Narayan Chakaabarti

127th Ravindra Jayanti
8th May, 1988
"Rishi Dham", P.O. Dattapukur
Dt. North 24 Parganas. Pin-743248
West Bengal, India.

प्राक्कथनम्

सुदीर्घकालादनन्तरं पूर्णतां गतो मे बहुदिवसप्रोषितो मनोरथः। प्रकाशं गत संस्कृतभाषामयं नाटिकाद्वयं "मुक्तधारा-वार्तागृहम्"॥ कवीन्द्रेण रवीन्द्रेण वङ्गभाषया रचिता नाटिका कविकुलकिंकरेण सुरभारती-सेवकाधमेन मया संस्कृतभाषया चानुकल्पिता। संस्कृतप्रणयिनां तथा सहृदय-रसिकानाञ्च सन्तोषविधानार्थं, निखिले जगतीतले वङ्गभाषानभिज्ञानां संस्कृतविदां रवीन्द्रसाहित्यपाठजनितानन्दसन्दोहजननार्थमधुना खलु नाटिका-द्वयं सामाजिकानां पुरतः श्रद्धया निवेद्यते।

मम पितृचरणानामनुवर्तनेनाशैवं सारस्वतसेवायां निरतोऽहं सुरभारत्या वङ्गभारत्याश्चानुपम-माधुर्यरसेन सुतरामभिषिक्तः। परञ्चेदानीन्तनकवि-कुलललामभूतः कविसार्वभौमो रवीन्द्रनाथः शाश्वतभारतीयसंस्कृतेः प्रमूर्तो विग्रह इति मे प्रतिभाति। नवनवोन्मेषशालिनी या खलु सारस्वती प्रज्ञा, तस्या लोकोत्तरप्रतिभायास्त्वधिकारी रवीन्द्रनाथः। प्रतिभायाश्चैतस्याः, विकाशे गीर्वाणवाण्या अन्तहीनमवदानं संलक्ष्यते। संस्कृतसाहित्यस्य सरसभूमौ हि प्रोथितं रवीन्द्रसाहित्यरूपिणः कल्पतरोर्मूलम्। सार्थको-पाधिकस्य महर्षेः पितुः शिक्षया दीक्षया च तस्य कैशोरं चित्तमुपनिषदो भावादर्शेन जीवनप्रभात एव समुद्बुद्धमासीत्। द्विजेन्द्रनाथ-सत्येन्द्रनाथ-ज्योतिरिन्द्रनाथ-प्रमुखाणां महामनस्विनामग्रजानामकुण्ठसंस्कृतसाहित्यज्ञानेन च तरुणे वयस्येवासौ कविः प्रभावितः। तस्य सुदीर्घजीवनास्तृत-ज्ञान-कर्मसाधनायां सदैव संलक्ष्यते संस्कृतभाषायाः संस्कृतकाव्यस्य च घनिष्ठः संयोगः। ऊनविंशशतके यद्यपि स आविर्बभूव, तथापि संस्कृतसाहित्यस्य वैदिके तथा पौराणिके युगे विहरति तस्य सौन्दर्यसन्धायि कविचेतः। भावादर्शेन रवीन्द्रनाथो वैदिकानामृषीणां सगोत्रः, रूपकल्पनेन च संस्कृत-पौराणिक-कवीनां स खलु सतीर्थः। उपनिषद अध्यात्मसम्पन्निचयेन, रामायण-महाभारतयोः समुदार-चरित्र-चित्रणेन, अमरु-भर्तृहरिप्रमुखाणां सुकुमारश्रृङ्गारसज्जया, कादम्बरी-हर्षचरितयोः प्रसन्नगम्भीर-रचनाशैल्या— तथा निखिल-संस्कृत-साहित्यस्योदात्त-महिम्ना मधुर-सौकुमार्येण च स खलु चिरमेव मुग्धः प्रबुद्धश्चासीत्। किमधिकं तस्य गद्यपद्यानां

वाग्विन्यासः प्रायशस्तेन साकं कालिदासस्य सातिशयं परिचयमावहति। अतो ये खलु वैदेशिकपण्डितमूर्धन्याः काव्यरसिकाश्च रवीन्द्रनाथं साग्रहं समादृतवन्तस्ते खल्वासन् सर्वं एव प्रायः संस्कृतविद्यानिष्णाताः भिंटारनिज्-सिल्भ्याँलेभि-लेस्नि-नर्मान्ब्राउन्-प्रमुखाः। प्राच्यविद्यानिष्णाताः पण्डितप्रकाण्डाः रवीन्द्रकाव्ये परिचितसंस्कृतनिष्ठप्रियस्वराणामालपनमाकर्ण्य-रवीन्द्रसाहित्यसमादरे पुरोयायिनः सञ्जाताः। प्रसङ्गेऽस्मिन् रवीन्द्रनाथस्य सप्ततितमवर्षपूर्तिमुपलक्ष्य पाश्चात्यमनीषिणा शैलकण्ठभट्टेन (Prof. Sten Konow) विरचितः श्रद्धाञ्जलिः सदैव स्मरणीयः—

"It was an Indian poet who at last opened the eyes of the West. Through William Jones' translation of Kalidasa's Sakuntala Europe came to know something about India's soul, about the ideals, the aims, and the aspirations of the people of India. And this led to a keen interest in India, her history and civilisation.

It was, however, chiefly ancient India which attracted the interest of the west. Kalidasa was the poet, and the ancient seers and thinkers were the last and noblest product of India's genius.

Even when modern Indians come to play a role in the spiritual development of the West, it was chiefly as interpreters of the wisdom of the past that they were greeted and admired.

Then came the day when another Indian poet conquered the West. This time it was not one of by-gone times, but one who lived and sung in modern India, whose tune was that of the Indian landscape, the Indian river, the Indian forest and the Indian village of today.

Again the West listened and marvelled. *It found the same authentic beauty, the same sublime flight of thought as in Kalidasa's immortal works : the old spirit was still alive.* (The Golden Book of Tagore. Page. 130.)

संस्कृताश्रितस्य यस्य खलु भावादर्शस्य गुणग्राही आसीदसौ पण्डितवर्यस्तमेव भावादर्शं रवीन्द्रमानसे दृष्ट्वा स नितरां श्रद्धाप्लुतः सञ्जातः। ईशवीयैकत्रिंशदुत्तरोनविंशशतकस्य सेप्टेम्बरमासस्य विंशदिवसे वङ्गप्रान्तीय-संस्कृत-पण्डिताः "कलिकाता-राष्ट्रिय-संस्कृत-महाविद्यालये" 'कविसार्वभौम' इत्युपाधिना रवीन्द्रनाथं संवर्धयामासुः। संस्कृत-शिक्षां विना भारतीयानां मातृभाषाशिक्षा व्यर्थतां गमिष्यतीति विचिन्त्यायं महाकविस्तत्प्रतिष्ठित-विश्वभारती-विश्वविद्यालये स्वयमेव छात्रान् प्रथमतः संस्कृतभाषां पाठितवान्। विश्वविद्यालयेऽस्मिन् महामहोपाध्याय-विधुशेखरशास्त्रि-देशिकोत्तम क्षिति-मोहनशास्त्रि-महोदयप्रमुखाः प्रायः सर्वे शिक्षकाः संस्कृतनिष्णाता आसन्। तत्र हि उपनिषन्मन्त्रोच्चारणेन छात्राणाँ दिवसारम्भो जातः। सर्वभारतीय-क्षेत्रे संस्कृतभाषाव्यवहार एव आसीत्तस्य प्रवणता। यदा तु चैनिकसांस्कृतिक-प्रतिनिधयः शान्तिनिकेतनमागतास्तदा संवर्धनासभाया अनुष्ठानानि संस्कृत-भाषयैव रवीन्द्रनाथः परिचालितवान्। महापण्डितस्य भिण्टारनिज्महो-दयस्यापि संबर्धनासभा संस्कृतेनैव निर्वाहिता। तदा तु "अभिज्ञानशकुन्तल"-मिति नाटकस्य अभिनयोऽपि विहितः। ईशवीय-चत्वारिंशदुत्तरोनविंशशतके उक्षतीर्थविश्वविद्यालयपक्षतः (Oxford University) सम्मानात्मक-साहित्याचार्येत्युपाधिग्रहणकाले (D. Litt.) "भारतीयकविः" रवीन्द्रनाथ शाश्वताखण्डभारतीयसंस्कृतेः धात्रीस्वरूपया संस्कृतभाषयैव समावर्तन-प्रतिभाषणं प्रदत्तवान्। भट्टवाणस्य गद्यरीत्या सुरचितं तस्य गीर्वाणवाणीमयं भाषणमांगलं प्रतिरूपञ्च विपश्चितां तृप्तये समुद्ध्रियेते।—

"भवन्त उक्षतीर्थ-विश्वविद्यालय-प्रतिभुवः!

एषोऽस्मि कश्चित् कविर्भारतवर्षस्य। तं मां सम्भावयन्ती सा किल भवतां प्रत्ना विद्याभूमिर्नूनमात्मनो मानवधर्माम्नायमेव महान्तमाविष्कर्तुम् ईहते यस्य खल्वर्थः साम्प्रतमतितरां गम्भीरश्च अनतिपात्यश्च संवृत्तः। गर्वोत्तानं मे चित्तं प्रतिपद्यास्य वाचिकं प्रतिपत्तिं चैतां प्रहितां प्रतीकमिव अनश्वरं मानवधर्मात्मनः। सभाजयामि भवतोऽत्र शान्तिनिकेतने। यदेतदनर्धमुपायनमानीतं भवद्भिर्मदर्थं मद्देशार्थञ्च, चिरं तदवस्थास्यते अस्मद्धृदयेषु, सम्पत्स्यते च तद् भवतामस्माकञ्च साधारण-संस्कृति-सम्पत्तय इति प्रतियन्तु भवन्तः।

स खल्वयं कालः प्रवर्धते यत्राङ्कः। तिरोधत्ते गुणः। प्रसरति अशिष्टत्वं निरङ्कुशम्। प्रवर्तते च पशूचिता स्पृहा भोगे समुपचीयमाना भूतविद्यया।

अस्मिन् हि व्यतिकरे कस्यापि भुवनव्यापिनः सम्बन्धस्य बीजसमुद्गमोक्तिर्नाम कदाचित् कविजनोचितेव प्रतीयते। तथापि तु संयम्यते कालस्तर्जयन्नपि निरन्तरम्। किञ्च ये नाम वयम् अतीत्याप्येनं जीवामः प्रतीमश्च यदार्यधर्मश्चरमार्थसम्पत्तये वर्धेतैव नित्यमिति तैरस्माभिः सेयं प्रतीतिरवश्यं प्रत्यग्रीकरणया।

क्षेमं वतेदं निमित्तं कस्याप्यनागतस्य समयस्येति प्रतिगृह्यते मयैषा प्रतिपत्तिर्विहिता उच्चतीर्थविश्वविद्यालयेन। नूनं न जीविष्याम्यहम् अवलोकयितुमेनं प्रतिष्ठितम्।

सभाजनीयस्त्वेष तस्य सप्रणयः सङ्केतः सङ्गरः इव दिवसानां प्रशस्यतराणामिति शिवम्।

शान्तिनिकेतनम्
शकाब्दाः १८६१-४-२२

रवीन्द्रनाथठाकुरः"

कविगुरुकृतमाङ्गलप्रतिरूपम्—

"Delegates from Oxford University,

In honouring me, an Indian poet, your ancient seat of learning has chosen to express its great tradition of humanity. This tradition, to day has acquired a deeper and more pressing significance. I feel poud to accept its message, and the recognition it conveys, as a symbol of the undying spirit of man. I welcome you here at Santiniketan, and I assure you that this friendly gift that you have brought to me and to my country, will remain in our hearts and bid us stand together for the common cause of civilisation.

In an era of mounting anguish and vanishing worth, when disaster is fast overtaking countries and continents with savagery let loose and brutal thirst for possession

augmented by science, it may sound merely poetic to speak of an emerging principle of world-wide relationship. But, Times violence, however immediately threatening, is circumscribed, and we who live beyond it and dwell also in the larger reality of Time, must renew our faith in the perennial growth of civilisation toward an ultimate purpose.

I accept this recognition from Oxford University as a happy augury of an Age to come and though I shall not live to see it established, let me welcome this friendly gesture as a promise of better days."

अतः, संस्कृतभाषायाः साहित्यस्य च भावसम्पद्भिः सुसमृद्धं यद् वङ्गभाषामयं रवीन्द्रसाहित्यं तस्यानुवादविषये संस्कृतभाषैव योग्यतमा भाषा। भावादर्शस्य ऐक्यात्, रूपकल्पनस्य च सादृश्यात् साहित्यस्यास्य मौलिकभावसम्पदः संस्कृतेनैव सुरक्षिता भविष्यन्ति। अतः खलु रवीन्द्रनाटकस्य संस्कृतानुवादे मे प्रयासः।

किञ्च, रवीन्द्रसाहित्यस्य संस्कृतानुवादेन सिध्यत्यपरमपि सुमहत् प्रयोजनम्। तत्तु, निखिले भारते सर्वेषां जनानामैक्य-संविधानं तथा भावगतसंहतिसाधनम्। सुप्राचीनकालादारभ्य सामग्रिकभारतीयसंस्कृतेः केवलमेकैव धात्रीयं विज्ञानसम्मता सुरभाषा। भाषामिमामाश्रित्य प्रतियुगमेव भारतीयप्रज्ञायाः विचित्रः प्रकाशो नवनवरूपेण लीलायितः। अस्मिन् प्रसङ्गे सुविख्यातस्फाररसिकमनीषिणो डाः लूइ् रेणो महोदयस्योक्तिः-स्मरणीया।—

"There is no living culture without a living tradition. If India is beloved and cherished among the elite of the west, it is on accouut of her traditional culture. And this culture is embeded above all in the treasures of Sanskrit. Sanskrit and India are inseparably connected inspite of all the transitory harangues of the politicians."

(Dr. Louis Renou, Paris University.)

मोक्षमूलरप्रमुखाणां पण्डितप्रकाण्डानां सदुक्तयोऽपि स्मरणीयाः। उपमहादेशेऽस्मिन् निखिले भारते विराजते एकैवाखण्डा संस्कृतिः। सा तु संस्कृतभाषाश्रिता। यद्यप्यधुनातन-भारतीया विभिन्नभाषाभाषिणस्तथापि तेषां सर्वेषामैतिह्यन्तु एकमेव पुनः संस्कृतभाषाश्रितं च। हिन्दीभाषा, वङ्गभाषा, तामिलभाषा, अन्या या काऽपि वा इदानीन्तनी भाषा भवतु, सा त्वेव प्राधान्येन प्रदेशविशेषे प्रचलिता सीमिता च। अतस्तासां नास्ति सर्व-भारतीयमावेदनम्। संस्कृतमेव विभिन्नभाषाभाषिणां विभिन्न-देशवासिनां भारतीयानां स्वाभाविकं बन्धनसूत्रम्। केवलं संस्कृतभाषायामेव वर्तते सर्वभारतीयमावेदनम्। अतः प्राचीनकालादारभ्य ये खलु महात्मनो निखिले भारते भावधाराप्रचारार्थं बहिर्गतवन्तस्ते सर्वे भाषणकाले संस्कृतमेव आश्रितवन्तः। केरलदेशोद्भूत भगवान् श्रीमच्छङ्कराचार्यो वङ्गदेशसमुद्भूतो भगवान् श्रीकृष्णचैतन्यश्चाखिले भारते तयोर्धर्मप्रचारणे संस्कृतमेवा-वलम्बितवन्तौ, न तु प्रादेशिकीं भाषाम्। ऊनविंशशतके महात्मा राजा राममोहन-रायमहोदयो, विंशशतके दयानन्द-सरस्वती, श्रीमत् सीताराम दास ओंकारनाथ प्रमुखाः मनस्विनः संस्कृतमेवाश्रित्य सर्वभारते तेषां नवीनादर्शं प्रचारितवन्तः। अनया सर्वभारतीयभाषास्वरूपया संस्कृतभाषया यदि रवीन्द्रसाहित्यस्यास्य अनुवादः क्रियते, तदा सर्व एव भारतीयाः अधिकभावेन अस्य साहित्यस्य रसं ग्रहीतुं शक्ष्यन्ति, जातीयसंहतिश्च सुदृढा सम्भविष्यत्यचिरकालेनैव।

अतः खलु रवीन्द्रसाहित्यस्य संस्कृतानुवादे समायं प्रयासः। विशेषतः, ईशवीयैकषष्ठ्युत्तरोनविंशशतके रवीन्द्रजन्मशतवर्षपूर्तिमहोत्सवो निखिले विश्वे सर्वत्रैवायोजितः। एतदुपलक्ष्य उत्सवात् कति वर्षेभ्यः प्राग्रवीन्द्र-रचनानां संस्कृतानुवादे आत्मानमहं नियोजितवान्। एतद्विषये कवि-सार्वभौम-भ्रातुष्पौत्रस्य विदग्धस्य रसवेत्तुः प्रख्यातदेशहितव्रतिनः सौम्यदर्शन-सौम्यभाषि-श्रीयुक्त-सौम्येन्द्रनाथ -ठाकुर-महोदयस्य न केवलं प्रेरणा ताडना-ऽपि मया सकृतज्ञं संस्मर्यते। प्रथमतो मया रवीन्द्रनाथविरचितं "डाकघर" इति सुविख्यात-नाटकं "वार्तागृहम्" इति नाम्ना संस्कृतेनानुकल्पितम्। तत्तु "कलिकाता-केन्द्रीय-नागरिक-समिति"-प्रयोजिते रवीन्द्रजन्मशतवार्षिक-

महोत्सवे महता समारोहेण कलिकातायां "संस्कृत-साहित्य-परिषत्"सदस्यैरभिनीतं रसिकैः सामाजिकैश्चाभिनन्दितम्। तदनन्तरम् "अखिल-भारतीय-संस्कृत-साहित्य-सम्मेलन"स्य षड्विंशाधिवेशनस्य प्रथमे दिवसे स्वर्गत केन्द्रीय-मन्त्रिणः बलवन्त-नागेश-दातार-महोदयस्य साभापत्येन, कलिकाता-"संस्कृत-साहित्य-परिषदः" षट्चत्वारिंशत्तम-वार्षिकोत्सवे केन्द्रीय-संस्कृति-मन्त्रि-डाः हुमायुन्कवीर-महोदयस्य च पौरोहित्येन, कलिकाता "आकाश-वाणीकेन्द्रे" च बहुशो नाटकमिदमभिनीतं समभिनन्दितञ्च विद्वद्भिः। एतद् "वार्तागृहम्" भारतसर्वकारेण प्रकाशनार्थं गृहीतम्। भारतसर्वकारेण साहित्य-आकादेमीतः प्रकाशिते "संस्कृतरवीन्द्रम्" इति ग्रन्थे वार्तागृहम् सन्निविष्टम्। अनेनोत्साहं संप्राप्य मया "मुक्तधारा"-नाम्नी विख्यात-नाटिका पुनरनूदिता, कलिकाता-"संस्कृत-साहित्य-परिषत्" पत्रिकायाञ्च धारावाहिकक्रमेण प्रकाशिता। साऽपि गुणग्राहिणां प्रोत्साहनात् ग्रन्थरूपेण प्राकाश्यं नीता। पण्डितकुलधुरन्धर-डः वेङ्कटेश-राघवन् महोदयेनानुरुद्धः रवीन्द्रनाथस्यानुपम-क्षुद्राख्यानानामपि संस्कृतानुवादं कृत्वा प्रकाशनार्थं तत् सकाशमेवाऽहं प्रेषितवान्। "कलिकाता-संस्कृत-साहित्य-परिषत्-पत्रिकायाः" "रवीन्द्रसंख्या" तु रवीन्द्ररचनानां संस्कृतानुवादैरतीव समृद्धा।

भवतु, अस्मिन् महति कर्मणि मम प्रवेशो नाऽभविष्यद् यदि कतिचिन्-महान्तो मां स्निग्धदृष्ट्या सहायतां नाऽकरिष्यन्। प्रथमतो मम परमाराध्यः पितृदेवः कविशेखरः श्रीयुक्त-विश्वेश्वर-विद्याभूषण काव्यतीर्थ-काव्यरत्न-महोदयो न केवलं मम जन्मदाता, अपि तु शिक्षादाता, मम सारस्वतसाधनायाञ्च दीक्षादाता। अस्मिन्ननुवादे यदि कुत्रापि गुणा दृश्यन्ते, तास्तु तस्यैव; दोषास्तु सर्वे ममैव मूर्खताप्रसूताः—इति ध्रुवमेव। मम मातृदेवीनां श्रीयुक्तानां महामाया-देवीनां शुभप्रेरणा चास्मिन् कर्मणि सदैव स्मर्यते। पुनर्मम सहधर्मिणीनां राजनीतिविज्ञाने "एम्-ए" इत्युपाधिधारिणीनामपि श्रीमतीनाम् ऊषा-देवीनामान्तरिकी सहायता संस्कृतग्रन्थप्रकाशरूप-कर्मण्यस्मिन् संलब्धा। दर्शनशास्त्रे एम्-ए तथा जार्मान्-फ्रेञ्च-प्रभृतिषु भाषास्वपि उपाधिधारिण। तनयस्य मे श्रीमती निर्माल्य नारायणचक्रवर्तिनः कर्मण्यस्मिन् सेवा संस्मर्यते।

कविवर्यस्य रवीन्द्रनाथस्य भ्रातुष्पौत्रः कर्मज्ञानसमन्वयैकमूर्तिः सार्थकनामा श्रीयुक्त-सौम्येन्द्रनाथ-ठाकुर-महोदयो ग्रन्थस्यास्य भूमिकां विरच्य्य मां कृतार्थीकृतवान्। रवीन्द्रसाहित्यविश्लेषणे तस्य दाद्यं जगत्यतुलनीयम्। वरेण्याय तस्मै महात्मने निवेद्यते मया भक्तिविनम्रा श्रद्धा।

ग्रन्थस्यास्य प्रकाशनमभिलक्ष्य भारतसंघस्य महामान्य-प्राक्तन-राष्ट्रपतीनां प्रतिभाप्रोद्भासितदिङ्मण्डलानां विश्ववरेण्य-दार्शनिक-वर्याणां परमाचार्य-श्रीयुक्त-सर्वपल्ली-राधाकृष्ण-सर्वागमसार्वभौम-महोदयानामाशीर्वचनं संलभ्य यातोऽहं कृतार्थगणनम्। भारतीय-संस्कृतेस्तेभ्यो मूर्तविग्रहेभ्यो निवेद्यते मया सबहुमानः श्रद्धा-प्रसूणाञ्जलिः।

ज्ञानकर्मभक्तीनां त्रिवेणीसंगमो यस्य मानसक्षेत्रं भूषयति, कविसार्वभौमस्य रवीन्द्रनाथस्य भावादर्शप्रचारणे यः खलु योग्यतमो नायकः, प्रशासकः यः खलु सिद्धः सारस्वतः, रवीन्द्रभारती-विश्वविद्यालयस्य माननीयो भूतपूर्वोपकुलपतिः श्रीयुक्त-हिरण्मय-वन्द्योपाध्याय-आइ-सि-एस्-महोदयो खल्वासीत् मयि सन्तत-स्नेहशीलः। एतन्महति कर्मणि शुभकामनां विज्ञाप्य तत्रभवान् मां कृतार्थी कृतवान्। एतेभ्यो मनीषिभ्यो निवेद्यते मया कृतज्ञतामधुरा प्रणतिः।

येषां खलु महामनीषिणां संस्कृत-साहित्यसम्प्रचारे अकुण्ठसहयोगितां, कर्मण्यस्मिन् च गभीरं स्नेहपूतमाशीर्वचनञ्च संप्राप्य धन्योऽहं—तेभ्यो विश्वविख्यात-प्राच्यतत्त्वविद्भ्यो भाषाचार्येभ्यः श्रीयुक्त-सुनीति-कुमार-चट्टोपाध्याय एम्-ए, डि-लिट् (लण्डन, रोम) महोदयेभ्यः सविनयं समर्प्यते मम भक्तिकुसुमाञ्जलिः।

सारस्वतकुल-ललामभूतानां, पण्डितकुलधुरन्धराणां प्राच्यपाश्चात्य-विद्यार्णवपारंगतानामन्तेवासिषु स्नेहनिर्झरस्वरूपाणां कलिकाताविश्वविद्यालय-प्राक्तनाशुतोषाध्यापकानां नवनालन्दामहाविहारस्य शीलभद्रसदृशानां महाध्यक्षपादानां मदीयाचार्यवर्याणां डः श्रीयुक्त सातकड़ि-मुखोपाध्याय एम्-ए, पि-एइच्-डि-महोदयाना-माशीर्वचनेन कृतकृत्योहं तेषां चरणकमलेषु प्रणमामि।

पण्डितमूर्धन्या ममाचार्यचरणा महामहोपाध्याय-श्रीयुक्त-कालीपद-तर्काचार्य-महोदयाश्चिरमेव मयि अमेयस्नेहपरायणाः। संस्कृतसाहित्यसंसदि अतुलनीयकीर्तिमतां सुरगुरुकल्पानामेतेषां पण्डितवर्याणां शुभाशंसनं संलभ्य कृतकृत्योऽहं सञ्जातः। तेषां चरणकमलेभ्यो नतमौलिरहं प्रणमामि।

सनातनधर्मादर्शस्य मूर्तविग्रहरूपाणां वर्तमान-संस्कृतसाहित्यजगति कालिदासकल्पानां मदीयाचार्यवर्याणां पण्डितराजानां श्रीयुक्त-श्रीजीव-न्यायतीर्थ-एम्-ए-डि-लिट्-महोदयानां प्रोत्साहनं मम जीवने दुर्लभा सम्पत्। तेषामाशीर्धन्येन मया तं महान्तमुद्दिश्य निवेद्यते कोटिशः प्रणामाञ्जलिः।

सुरभारतीसेवकोत्तमानां दिगन्त-विश्रान्त-कीर्तिमतां कलिकाता-विश्व-विद्यालय-प्राक्तन-प्राचार्यवर्याणां ममाध्यापकचरणानां पद्मभूषण-श्रीयुक्त-पट्टाभिरामशास्त्रि—शास्त्ररत्नाकर-विद्यासागर-पादानां सततस्नेहाशीर्वादं स्मरता मया तमुद्दिश्य निवेद्यते गणनारहितः प्रणामाञ्जलिः।

मम सारस्वताग्रजस्य अत्यागसहनबान्धवस्य कुरुक्षेत्र-भियेना-टरेण्टो-यादवपुरविश्वविद्यालय-प्राचार्यस्य दिवंगतस्य डक्टर्-श्रीगोपिकामोहन-भट्टाचार्य-एम्-ए, डि-फिल्, डेर्-फिल्-काव्यन्याय-तीर्थ-महोदयस्य अक्लान्तप्रचेष्टयैव ग्रन्थस्यास्य मुद्रणं प्रथमं सम्पादितम्। मयि तस्य स्निग्धं सुन्दरमानुकूल्यं सततमेव स्मर्यते, निवेद्यते च तस्मै प्रणयसमुज्ज्वला आन्तरिकी कृतज्ञता।

प्रसंगे चास्मिन् मम पूर्वतन-सहकर्मिणां रवीन्द्रभारतीविश्वविद्यालयस्य कलाविभागाध्यक्षाणां दिवंगतानां डक्टर्-श्रीयुक्त-साधन-कुमार-भट्टाचार्य-एम्-ए, डि-फिल्-महोदयानां, वंगभाषाविभागीयप्राचार्याणां डक्टर्-श्रीयुक्त-अजितकुमार-घोषवर्मन्-एम्-ए, डि-फिल्-डि-लिट्-महोदयानाञ्च प्रोत्साहनं संलभ्य तेभ्यो बहुशो धन्यवादाः प्रदीयन्ते।

शोभनेऽस्मिन्, कर्मणि ममाग्रजकल्पाः वर्धमानविश्वविद्यालय-प्राक्तन प्राचार्याः डः श्रीयुक्त-सिद्धेश्वर-चट्टोपाध्याय-एम्-ए, पि-एइच्-डि काव्यतीर्थ-महोदयाः, कलिकाताविश्वविद्यालयस्य भाषातत्त्वविभागाध्यक्षाः डः श्रीयुक्त-

सत्यरञ्जन-वन्द्योपाध्याय-एम्-ए, पि-एइच्-डि-महाभागाः, खृष्टीय-महिला-महाविद्यालय-संस्कृताध्यक्षाः श्रीयुक्त-रवीन्द्रनाथ-भट्टाचार्य-एम्-ए, वेदान्त तीर्थ-महाभागाः, परिषत्सदस्याः श्रीयुक्त-शक्तिप्रसाद-मुखोपाध्यायमहोदयाः, परिषत्ग्रन्थागारिकाः श्रीयुक्त मधुसूदन-काव्यतीर्थ-महाभागाः, परिषद-ध्यापकाः श्रीयुक्त-रामधन-काव्य-व्याकरण-पुराणतीर्थ-शास्त्रि-महोदयाश्च नानाविधं साहाय्यं कृत्वा मम धन्यवादपात्रतां गताः।

बहुकालं यावदेतस्य नाटिकाद्वयस्य पुनःप्रकाशनार्थं विदग्धैः रसिकैः समनुरुद्धोऽहम्। नेदानीं लभ्यते प्रथमं संस्करणम्। अतो रवीन्द्रनामांकितस्य मे कर्मतीर्थस्य कुलपतीनां करुणावरुणालयानां सुदत्त-सारस्वतप्रशासकप्रवराणां डः रमारंजन मुखोपाध्याय-एम्-ए, डि-लिट्-महोदयानामनुमत्या विश्वविद्यालयेन प्राकाश्यं नीयते ग्रन्थोऽयम्। तेभ्यो निवेद्यते हार्दिकी कृतज्ञता। वयसानुजोपि विद्ययाग्रजरूपो वर्धमानविश्वविद्यालयाध्यापक-प्रवरः डः प्रताप वन्द्योपाध्यायः एम्-ए, पि-एइच्-डि तथा देहली विश्वविद्या-लयस्य प्रवीणाध्यापकः ज्ञानभक्तिसमन्वयमूर्तिः डः श्रीवाचस्पति उपाध्यायः एम्-ए, पि-एइच्-डि मे संस्कृतानुकल्पनस्य पाण्डुलिपि-प्रणयने सहायतां कृत्वा धन्यवादभाजनं गतौ। कर्मण्यस्मिन् भारतराष्ट्रस्य महामान्य—वर्तमानीप-राष्ट्रपतीनां डः श्रीयुक्त शंकरदयाल शर्म-महोदयानां शुभाशंसनमुररीकृत्य-धन्योऽस्मि। विभिन्नेषु कालेषु नाटिकाद्वयस्य मञ्चेष्वभिनये कलिकाता-आकाशवाणीतश्च प्रसारणे बहवो मनीषिणो सारस्वताश्च ये अंशग्रहणं कृतवन्तः सर्वेभ्यस्तेभ्यो निवेद्यते मया हार्दिकी कृतज्ञता। अमलस्य भूमिकायां समभिनीय दिवंगताध्यापिका नन्दिनी साधु, संस्कृतसंगीतेषु च मधुकण्ठं प्रदाय सुरलोकप्रयाता सुरसरस्वती माधुरी मुखोपाध्याया देवी च निखिलान् सामाजिकान् सन्तोष्य मां धन्यीचक्रतुः। सरस्वत्याः वरपुत्रीद्वय-मूद्दिश्य क्रियते मया शोकाश्रुतर्पणम्।

*ग्रन्थस्यास्य प्रकाशने विश्वभारतीकर्तृपक्षस्य सानन्दानुमतिर्मया कृतज्ञता-पूर्वकं स्मर्यते।

* We are glad to communicate our approval to the publication of "Muktadhara" in Sanskrit by you................ (Letter No.—Per/5192—19th August, 1963 Visva Bharati, Publishing Dept. Calcutta.)

वङ्गीयमूलस्वरसंयोगेन सङ्गीतानामनुशीलन-सौकर्यार्थं सङ्गीतादौ वङ्ग-भाषायाश्छन्द एवानुसृतम्। सर्वविधस्खलनं सहृदयैः कृपया क्षन्तव्यमिति मे प्रार्थना।

अधुना येषां खलु संस्कृतप्रणयिनां सन्तोषाय, साहित्यरसिकानाञ्च सन्तृप्तये, रवीन्द्रकाव्यमधुपानाञ्च सम्मोदाय सुरवचसा रवीन्द्रकाव्यानुकल्पने क्षमताहीनस्य दीनस्य ममायं प्रयासस्तेषां सरसहृदयेषु यदि ग्रन्थस्यास्य पाठेनानन्दसन्दोहो जायते, तदैवाहं सार्थकप्रयत्नो भविष्यामि। अन्तत इदमेव मे वक्तव्यम्—

"आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्" इति शम्

सहृदयसेवकस्य श्री—ध्यानेश-नारायण चक्रवर्ति-देवशर्मणा।

१३६५ वङ्गाब्दीयसौरवैशाखस्य पञ्चविंशदिवसीयम्
शुभरवीन्द्रजन्मवासरीयम्
रवीन्द्र-भारती-विश्वविद्यालयः
५६ ए वि-टि रोड्
कलिकाता—५०

समर्पणपत्रम्

येषां खलु महात्मनां जननान्तरसौहृद-सम्भूत-दाक्षिण्यं संलभ्य
कर्मजीवनं मे विकशितं, सारस्वतजीवनञ्च धन्यं जातम्,
येषां भागीरथीप्रतिमया करुणामृतधारया सदैवाहम-
भिषिक्तस्तेषामेव कुलपतिकल्प-महाचार्याणां प्रतिभा-
प्रोद्भासित-प्राच्य-प्रतीच्य-भुवनद्वयानां कलिकाता-
संस्कृतमहाविद्यालय-महाध्यक्षाणां तथा वाराणसेय
संस्कृत-विश्वविद्यालयस्य कुलपतीनां ज्ञान-
कर्म-भक्तिसमन्वयविग्रहाणां प्रज्वलित-
सनातनधर्मप्रदीपाणां

महाचार्य—डक्टर्-श्रीयुक्त-गौरीनाथ-भट्टाचार्य-शास्त्रि-
एम्-ए, पि-आर्-एस्, डि-लिट्, एफ्-ए-एस्, महोदयानां
कल्याणकरकमलेषु दीनस्यान्तेवासिनः सारस्वत-
श्रद्धार्घ्यरूपेण समर्पितोऽयं ग्रन्थः ।

श्रीगौरीनाथ-शास्त्री मम गुरुपरमो ज्ञानशीलाभिरामः
नित्यस्नेहानुशीलः सुविमलचरितो देशविश्रान्तकीर्त्तिः ।
यत्पादाम्भोजसंगात् सुचिरविलसितं सिद्धिमाप्तं व्रतं मे
तस्य श्रीपाणिपद्मे ससुखमुपहृता नाटिका काव्यधारा ॥

PREFACE

Professor Bhabatosh Chatterjee
M.A., Ph.D., D.Litt.
VICE-CHANCELLOR

RABINDRA BHARATI UNIVERSITY
56A Barrackpur Trunk Road
Calcutta 700 050
15 April 1988

In imaginative literature, words are a vehicle of sensations and associations and convey meanings beyond the literal/denotative meanings. This explains the difficulty in translation and it has been debated whether literature can be successfully translated into another language. It is true that the Bengali language has in the main its roots in Sanskrit, and the rendering of Bengali into Sanskrit is less difficult. However, the task assumes a special significance when the author is Rabindranath Tagore, who speaks in images and whose words are many-edged and the achievement of Dr Dhyanesh Narayan Chakrabarti is indeed commendable. He is scrupulously faithful to the original, but his Sanskrit has a happy felicity that gives his translation both lucidity and an incantatory rhythm. Dr Chakrabarti is well-known for his erudition, but he is a scholar with a difference: he is a teacher with a mission and has earned the gratitude of all Indians for whom the work of Tagore is a cherished heritage and who have some familiarity with Sanskrit that is aptly described as the language of the gods.

15 April 1988 S/d. Bhabatosh Chatterjee

FOREWORD

There was a time when it was believed that it was not posssible to decipher the spirit of Tagore without ascertaining the treasures of Sanskrit, because Tagore inherited the traditions of Oriental Learning and the richness of Culture expressed by the Creative Compositions of Vedic Seers and thə grand Vālmīki and the great Vyāsa. Subsequent researches in the field of Tagore Studies have indicated the fact that the thoughts of Tagore constitute a reassertion of the Philosophies of Upaniṣads and the ideals envisaged in the creative mind of Vyāsa and Vālmīki in the context of contemporary situation in such a manner that it is not possible to catch the spirıt and Philosophy of ancient India without getting a first-hand acquaitance of Tagore's thoughts and ideas. This explains the necessity of rendering translations of the works of Tagore into various languages, including Sanskrit, which constitutes the repository of Indian Culture. Modern Mind has realised the truth that the Philosophy of universal understanding, mutual love and global fraternity, as propounded by Tagore constitutes the remedy of all evils of the present day society, which is marked by strays and torn by small bickerings of the craving soul The Clarion Call given to posterity by Tagore to implement the ideal of universal love by effecting expansion of ego-bounderies has now been accepted as the only way of fighting the evils of narrowness and the destructive forces that tend to keep the human being confined within the boundaries of earthly and small existence. This explains further the interest taken by modern man to dive deep into the ambassia of Tagore's writings and to experience the grandeur of his ever-shining Philosophy.

Though renderings of Tagore's writings into modern European and Indian Languages have been many, no serious attempt has yet been made to render these writings into Sanskrit so that lovers of oriental learning can have an easy access to them. The reason is obvious Whereas there are a number of scholars competent to translate the novels, dramas and poems of Tagore into various Indian and European languages, there are only a handful scholars of modern society, who havc the competence of translating these writings in to Sanskrit, retaining all the time the spirit of Tagore. The work of translation itself is extremely difficult, in as much as, it does not consist simply in giving equivalent expressions of the expressions employed by the Artist in various languages : the translator is required to instill the spirit of the writings as well in the translation. Poetry, as a mattər of fact, is a Gestalt, and it is not possible to take out even a single expression from the edifice of Poetry : if this is done, tho Poet may appear as saying something which he does not want to say. When this is the case, the difficult nature of the translator's job becomes all the more clear, because the translation of a Poem or a Novel or a Drama is a separate artistic creation, retaining the spirit of the original and shining at the same time in the splendour of the objective correlative, newly inducted by the translator. Since the spirit of Tagore's writings is extremely abstruse, being philosophical in nature, particularly in his Dramas, most of which are allegorical in character, it is only with utmost care that his writings can be translated successfully.

Posterity is indebted to Professor Dhyaneshnarayan Chakrabarti of Rabindra Bharati University for very kindly coming forward to render the writings of Tagore into Sanskrit and to make them available to the lovers of Oriental learning. Himself a great scholar in Sanskrit

Professor Chakrabarti is one of those front-ranking lover of Sanskrit, who have been expanding their energy in popularising Sanskrit with the ultimate objective of maintaining Indian Culture and in projecting its richness to the future mankind. He has already translated a few Poems and Dramas of Tagore, and the appreciation which he has received from the scholarly world on this score is simply astounding. Professor Chakrabarti possesses a thorough grasp over Tagore's Philosophy and his total command over Sanskrit idioms and Expressions has made it possible for him to build a new creation, shining in its own splendour and enshining at the same time the grand philosophy of Tagore. Gifted with a grand sense of music he translates the songs of the original in such a manner that the charmingness of the expression harmoniously blends itself with the spectacular success. Thus translating the song in the original :

> nācere nāce caraṇ nāce prāṇer kāche prāṇer kāche /
> Prahar jāge, praharī jāge, tārāy tārāy kāmpan lāge
> Marame marame bedanā phuṭe, baṅdhan tute, bāṅdhan ṭute...

Dhyāneshnārāyan says :

> Nṛtyati caraṇayugam, prāṇasamīpaṃ prāṇasamīpam/
> Jāgarti praharī, jagrataḥ praharaḥ
> Spandate kampate naksatranikarah.
> Marmeṣu marmeṣu vikasati vedanaṁ
> Mocyate bandhanaṃ mocyate bandhanaṃ.

The effect of the melody is easily understandable : the charmingness of the expression lends a special charm to the grand image carved out by the great Creative Artist in the original and subsequently by the successful translator in the new specimen of Poetry.

Rabindra Bharati Uṇiversity, which has for one of its objectives propagation of Tagore Culture has

decided to publish as a part of this 'Tagore Culture Programme' the second edition of the translations of 'Muktadharā, and 'Dāk-ghara', rendered by Professor Dhyaneshnarayan Chakrabarti in Sanskrit. The first edition of these two Sanskrit renderings had seen the light of the day long back, and the approbation which it received from the scholarly world had been austounding and and encouraging. The University is fortunate in having a dedicated and scholarly member of the academic community in Professor Chakrabarti who is presently known to all lovers of oriental learning and Indian Culture. I am sure the second revised edition of these two works will achieve equal celebrity and will be widely appreciated in the country and abroad. I congratulate the translator-artist and take great pleasure in presenting the new editions of Sanskrit renderings of 'Muktadhārā' and 'Dāk-ghar' to the bar of the academic world. I put on record further, my appreciation of the service rendered by the Publication unit of the University headed by Sm. Sibani Chatterji in the matter of publication of the new edition.

S/d. Ramaranjan Mukherji

1. 12. 87.

भूमिका

(१)

ईशवीय-द्वाविंशत्युत्तरोनविंश-शतकस्य 'जानुयारी'-मासि शान्तिनिकेतने विरचिता "मुक्तधारा"। पद्मेति तटिन्याः वक्षसि नौगृहे सप्ताहपरिमित-कालमुषित्वा शान्तिनिकेतनं प्रत्यागत्यैव कविर्नाटकमिदं प्रणेतुमारब्धवान्। ईशवीय-द्वाविंशत्युरोनविंशशतकस्य जानुयारीमासस्य त्रयोदशदिवसे तेन च परिसमाप्तं नाटकम्। "समग्रं सप्ताहं व्याप्य कस्यचिन्नाटकस्य विरचने निमग्नोऽहमासम्। मया च तस्य समाप्तिं नीताम्। अतोऽहमद्य मुक्तः सञ्जातः।" —इत्येवं बान्धवमेकमुद्दिश्य कविना कस्यांचित् लिपिकायां लिखितम्।

बन्धनमेकं निर्माय शिवतलाधिवासि-कृषीवलानां जलप्रवाहो निरुद्धीकृत उत्तरकूटाधिपतिना। तेन राज्ञा सुपरिकल्पित-निपीडनमभिलक्ष्य तत्रत्यानां कृषीवलानां संग्राममवलम्ब्य विरचितेयं नाटिका। कतिवर्षाणि यावत् सुशस्यमप्राप्य यदा ते राजस्वप्रदानम् अस्वीकृतवन्तस्तदा राजा पल्लीवासिनस्तान् अशान्तान् दण्डयितुमैच्छत्। शिवतलाधिवासिनः प्रति राज्ञो निष्ठुरं निपीडनं संलक्ष्य उत्तरकूटाधिवासिनस्तु हर्षंगताः। बन्धन-निर्माणकारिणं विभूति-नामधेयं राज्ञो मुख्ययन्त्राधिकारिकं ते नितरां प्रशशंसुः।

राजा तस्य राजशक्तिं यन्त्राधिकारिकं विभूतिञ्च नियोक्तुमभिलषन् मनुष्याविष्कृतं यन्नैर्व्यक्तिकं यन्त्रवलं, तस्यैव प्रकर्षं प्रमाणयितुं चेष्टयामास। शिवतलाधिवासिनां कृषिफलस्य जलाभावेन विनाशस्तेन च क्षुधया जनानामपि मरणं तेन मनागपि न परिगणितम्। "मत्कल्पितं बन्धनं जलस्रोतसा न ध्वंसयितुं शक्यते, अश्रुप्रवाहेण च मे यन्त्रं नापि शक्यते प्रचालयितुम्। प्राकृतिक-शक्तिनिचयेन सह यन्त्रस्य मे संग्रामः। मनुष्योत्सृष्टेण पुञ्जीभूते-नाभिशापेन नासाद्यते किमपि फलमिति" स सदर्पमुद्घोषयामास। एतासां शक्तीनां प्रातिकूल्येन—हृदयहीनायाः लुब्धायाश्च राष्ट्रशक्तेस्तथा च निरात्मि-कायाः नैर्व्यक्तिक-यन्त्रशक्तेश्च विरुद्धतया युवराजोऽभिजित् यन्त्रशक्ति-परिपुष्ट-दानव-बल-निपीडित-जनानां कृते तस्य मानवतायाः प्रेम्णः सहानुभूतेश्च शक्तिं प्रतिष्ठितवान्।

बन्धन-निर्माणकाले यद्दुर्वलस्थानमासीत्, तत्तु युवराजोऽजानात्। शिवतलस्य क्षेत्रेषु मुक्तधारायाः जलधारा यथा पुनःप्रवाहिता भवति एतदर्थं स बन्धनं विध्वंसयितुं स्थिरीकृतवान्। राजा तम् अस्मात् निवर्तयितुमचेष्टत। पुनर्व्यर्थः सन् स युवराजं कारायामक्षिपत्। कारावन्धनात् युवराजस्य पलायने अवसरदानार्थं युवराजानुगामिनः कारागृहे अग्निसंयोगं कृतवन्तः। गभीरे निशीथे युवराजो बन्धनस्थलमुपगम्य तस्य दुर्वलस्थानमाहत्य तद् विध्वस्तवान्। एवं प्रवाहस्य बन्धनबाधा दूरीभूता। एतावत्कालं यावत् निरुद्धो मुक्तधारायाः जलराशिः महता स्रोतसा पुनःप्रवाहितः। तेन स्रोतसा अभिजिदपि अपवाहितः।

"यन्त्रमाहन्ति जीवनम्। अतोऽभिजित् न तु यन्त्रशक्त्या, अपि तु स्वजीवनोत्सर्गेण यन्त्रं विध्वस्तवान्। ये खलु तावद् यन्त्रेण मानवं पीडयन्ति, तेषां कार्येषु भीषणो दुर्विपाकः प्रच्छन्नरूपेण तिष्ठति। यतो, यां मानवतां ते विनाशयितुं चेष्टन्ते, सा तु मानवता तेष्वपि दृश्यते। तेषां स्वकीयं यन्त्रं तेषामेव अन्तःस्थितं मानवात्मानं पीडयति। मम नाटकीयपात्रविशेषोऽभिजिदेव निपीडक-हृदये प्रच्छन्नः स्थितः। स हि पीडितो मानवात्मा। तस्य स्वकीय-यन्त्रस्यैव पीडनात् मुमुक्षुः स जीवनम् उत्सृष्टवान्"—एतन्नु सुहृदमेकमुद्दिश्य कविसार्वभौमेण पत्रे लिखितम्।

निखिले जगतितले संकीर्णजातीयतायाः उन्मत्तोल्लासं रवीन्द्रनाथो महता दुःखेन परिलक्षितवान्। विवर्धमान-विद्वेषस्य, संगरस्य, शोणितपातस्य तथा मानवतायाः निपीडनस्य च कारणभूता या गोष्ठीपरतन्त्रता, तस्या एव विकाशरूपा खलु सा जातीयता इति सोऽचिन्तयत्।

विज्ञानस्य यन्त्रस्य च विरोधी नासीत् कदापि कविवर्यः। किन्तु यन्त्रस्य दुर्निवारस्य आधिपत्यस्यैव स खल्वासीत् सर्वथा प्रतिकूलवादी। सार्वभौम-मानवतासकाशे यन्त्रेण नूनं वश्यता स्वीकरणीया। सत्योपलब्धये ज्ञानन्तु कर्मणः स्वाधिकारे निश्चितमेव समागच्छेदित्येव प्रोक्तं तेन।

गभीरव्यञ्जनागर्भैरुत्तमसंलापैः, संयमेन, सारल्येन च भूषितं नाटकमिदं सुषमामण्डितां सुमहतीं काव्यपदवीमारूढमिति मन्ये।

ईशवीयैकषष्ट्युत्तरोनविंशशतके कविवर्यस्य जन्म-शतवार्षिकमहोत्सवम् उपलक्ष्य कलिकाता-केन्द्रीय-नागरिक-समितिः रवीन्द्रनाथविरचितानां कति-

चिन्नाटकानां गीतानाञ्च संस्कृतेनानुवाद-निर्माणाय परिकल्पनां कृतवती। समितिकल्पिता एषा परिकल्पना तरुण-संस्कृताध्यापकद्वयेन साग्रहं परिगृहीता। रवीन्द्रभारती-विश्वविद्यालयाध्यापकेन, समितिसदस्येन श्रीमता ध्यानेश-नारायण-चक्रवर्ति-शास्त्रिणा "डाकघर" इति नाटकस्य "वार्तागृहम्" इति नाम्ना संस्कृतभाषया अनुवादो विहितः। अनन्तरं संस्कृतमहाविद्यालयाध्यापकेन श्रीमता विमलकृष्णमतिलालेन "रथेर रशि" इति नाटकस्य "रथरज्जुः" इति नाम्ना संस्कृतानुवादः कृतः। संस्कृतेनानूदितम् एतन्नाटकद्वयं बहुशोऽभिनीतं विदग्धैर्दर्शकैश्चाभिनन्दितम्।

अध्यापकप्रवरेण श्रीमता ध्यानेश-नारायण-चक्रवर्तिना पुनरधुना "मुक्तधारा" इति नाटकं संस्कृतभाषया अनुदितम्। निखिले भारते साहित्यरसिकैरयमनुवादो नूनं नितरामभिनन्दितो भविष्यतीति सुदृढो मे आशयः। मूलानुसारी चायमनुवादोऽतितरामुत्कर्षमुपगतः। भारतीयजनानां सांस्कृतिकसंहति-साधनार्थं गुरुदेव-रवीन्द्रनाथ-विरचितानां रचनानां संस्कृतेनानुवादे अध्यापक-चक्रवर्तिमहोदयो निरतस्तिष्ठत्विति मे ऐकान्तिकी कामनेति—

श्रीसौम्येन्द्रनाथ-ठाकुरस्य

अक्टोवरमासस्य विंशदिवसः, १९६३
४ संख्यक एल्गिन् रोड्, कलिकाता।

PROEM

"Muktadhara" was written at Santiniketan in January, 1922. After spending a week in his houseboat on river "Padma", the poet returned to Santiniketan and immediately commenced writing this playlet which he finished on the 13th January, 1922. In a letter to a friend the poet wrote—"I had been busy the whole week writing a drama. I have finished it. So, now, I am free."

The theme of this playlet deals with the struggle of the peasants of the village Shivtarai against the calculated act of tyrrany of the king of Uttarkut who had stopped their water-supply by the construction of a dam near the spring "Muktadhara". The king wanted to punish the turbulent villagers of Shivtarai who had refused to pay him taxes as they did not get good harvest a number of years. The villagers of Uttarkut were delighted with the king's cruel measures against the villagers of Shivtarai. They were full of praise of Bibhuti, the chief mechanic of the king, who had built the dam.

The king wanted to assert his royal power and Bibhuti, the mechanic, wanted to prove the excellence of the machine that represented the impersonal mechanical power, invented by man. He did not care if crops of the villagers of Shivtarai would perish for lack of water, and men would die from hunger. Boastingly he asserted :—"My dam cannot be toppled down by the current of water, and my machine cannot be moved by the flood of tears My machine is at war with the forces of nature, curses heaped upon it by men are of no consequence'.

Against these forces—the heartless and covetous state-power and the soulless impersonal power of the

machine—Prince Abhijt pitted his force of humanism, love and sympathy for the people ground down by the demon of power aided by the force of machine.

The prince knew the weak spot in the construction of the dam. He resolved to demolish the dam so that the waters of "Muktadhara" may once again flow in the fields of Shivtarai. The king tried to desude him from this, but he failed to do so and he imprisoned the prince. The followers of the prince set fire to the prison-camp so that the prince may escape from his captivity. In the dark night the prince reached the dam, hit the weak spot of the dam and broke it. The dam gave away the waters of "Muktadhara", imprisoned so long, once again flowed in mighty current –but prince Abhijit was carried away by the flood.

In a letter to a friend the poet wrote the following about his playlet—"Machine is hurting life. So, Abhijit smashed the machine, but not by the power of machine but by sacrificing his own life. A terrible tragedy lurks in the activities of those who hurt man by machine. Because, the humanism, they try to destroy is also to be found in them. Their own machine is hurting the inner man within them. Abhijit of my playlet is the oppressed inner man lying hidden in the heart of the oppressor. He has sacrificed his life in order to be free from the tyranny of his own machine."

Rabindra Nath had obeserved with keen regret the orgies of chauvinism throughout the world. He considered nationalism as the manifestation of tribalism, responsible for the mounting hatred, conflict, bloodshed and the mutilation of humanity.

The poet was by no means against science or machine. But, he was wholly against the untramallled autocracy of the machine. Machine must owe its

allegiance to Universal humanism. "Knowing must come under the control of Being," if truth is to be realised.—he said.

This playlet is replete with superb dialogues of great suggestiveness. The intensity of the emotional texture of the playlet and its restraint and simplicity make the play a thing of great literary excellence and beauty.

During the birth centenary celebration of the poet in 1961, the Citizens' Centenary Committee, Calcutta, had hit upon the happy idea of rendering some dramas and songs of Rabindranath in Sanskrit. This idea suggested by the Committee was enthusiastically accepted by two young professors who are Sanskrit scholars. Two playlets—The "Post office" and the "Chariot of time" were rendered in Sanskrit by Professor Dhyanesh Narayan Chakravarty, Sahitya-Sastri of Rabindra-Bharati University and by Professor Bimal Krishna Matilal of the Sanskrit College, respectively. The plays were staged and were greatly appreciated by a distinguished audience.

Professor Dhyanesh Narayan Chakravarty has now translated the "Muktadhara" in Sanskrit. I am certain that it will have a warm reception from the lovers of literature throughout India. The translation is true to the original and is moreover excellent.

I earnestly hope that Professor Chakravarty will continue this great work of rendering Gurudeva's works in Sanskrit and thereby advance the cultural integration of the people of India.

20th October, 1963. **Saumyendranath Tagore**
4 Elgin Road

शुभाशंसनम्
Good Wishes

RASHTRAPATI BHAVAN,
NEW DELHI-4.
राष्ट्रपति भवन,
नई दिल्ली-4

May 8, 1963.

Dear Sri Chakravorty,

I am glad to know that you are bringing out ~~Dr.~~ Tagore's works in Sanskrit I hope Sanskrit readers will find them useful.

With the best wishes,

Yours sincerely,

(S.Radhakrishnan)

Sri Dhyanesh Narayan Chakravarty
132/5 Sarat Ghosh Garden Rd,
Calcutta-31.

PS: I am returning the MSS.

VICE-PRESIDENT, INDIA,
NEW DELHI
उप-राष्ट्रपति, भारत,
नई दिल्ली

January 27, 1988

Dear Dr. Chakravorty,

I thank you for your letter of 10th January, 1988 and for your New Year greetings which I heartily reciprocate.

I was not aware that you have translated Rabindranath Tagore's works in Sanskrit way back in 1963. I am happy that the Rabindra Bharati proposes to bring out another edition of your publication. I am sure it will be received with great enthusiasm both by lovers of Sanskrit and the great son of India—Rabindra Nath Tagore.

With kind regards,

Yours sincerely,

S/d. S. D. Sharma

Dr. Dhyanesh Narayan Chakravorty,
'RISHI DHAM'
P. O. Dattapukur,
Dist. 24 Parganas,
West Bengal.

Prof. Dr. Giuseppe Tucci
ISTITUTO ITALIANO
PER IL

VIA MERULANA, 248
(Palazzo Brancaccio)
Telef. 735-631

29th, March, 1965

I have here found your kind letter and your Sanskrit translation of Tagore's drama *Muktadhara*.

I am Glad at the opportunity of stating my sincere appreciation of the work you have done, which is truly excellent from every point of view ; your fine translation captures to the full beauty of Tagore's drama, and your mastery of Sanskrit is quite exceptional. The language that you so thorughly possess is made to stress every slightest shade of meaning, so that on the whole your translation deserves the highest commendation.

With my warmest congratulations for this unusual literary achievement, I remain, with kind regards, and good wishes for the pursuance of your work.

Yours Sincerely,

Sd/- GIUSEPPE TUCCI

Prof. Dr. Ernst Steinkellner
Wien
Indologisches Instituta
der
Universität Wien

Wien, den 15 January., 1966
1, Universitätsstra Be 7
Tel 332661/569

It gives me genuine pleasure to read the Sanskrit translation of Tagore's Muktadhārā by Professor Dhyanesh Narayan Chakrabarti Sāhitya Śāstri, who has already to his credit a number of such translations in Sanskrit from Tagore. Prof. Chakrabarti's lucid style fascinated me, his command of Sanskrit enchanted me. I am sure that a reader, who is not well-up in Bengali, would surely taste the sentiment in Tagore's writings through this translation. I would only hope that Professor Chakrabarti would further go ahead with his endeavour so that the Sanskrit knowing reader might have an opportunity to dive deep into Tagore's immortal works.

Sd/- Dr. Ernst Steinkellner

Prof. Dr. Wilhelm Rau
Marburg.
INDISCH-OSTASIATISCHES SEMINAR
der
Philipps-Universitat

355, MURBURG, 8th July 1965.
Universitatsstr. 10.
Tel. 75-3647.

Dear Professor Chakrabarti,

Let me tell you with hearty thanks that both your beautiful sanskrit translation of poet Tagore's Muktadhara and your kind letter dated 8th April 1965 have reached me about two months ago.

Since then I have perused your book carefully and was delighted time and again by the beauty as well as the felicity of your rendering. It is in my opinion a very praiseworthy undertaking, introducing the works of Poet-Tagore clothed in attractivc sanskrit garb to all connoisseures of this language, i.e. to your countrymen beyond the borders of Bengal no less than to sanskrit scholars the world over.

I wish you every success in continuing this noble task.

With best regards.

Yours very sincerely,

Sd/- Wilhelm Rau

Professor Suniti Kumar Chatterjee, M.A. (Cal.)
D. Litt. (Rome), D. Litt. (London), F.A.S.
Bhāṣācārya, Padmavibhūṣaṇa.
Chairman,
LEGISLATIVE COUNCIL
West Bengal, Calcutta.
April 10, 1964.

Rabindranath is such a great poet that his works in addition to being translated in the modern languages of the world deserve to be enshrined in the hall of outstanding productions in the classical languages, if suitable renderings of his compositions can be made. Unquestionably, apart from a work like the Gita and the Upanishads and Kalidasa, Rabindranath is the only Indian writer who has been brought with in the purview of speakers of almost all the important languages of the world. Besides, like some of our other classics in the mediaeval and modern languages, quite a considerable selection of his poetical works has been rendered into the classical language of India also. The total output from Indian scholars of Sanskrit who have dressed the muse of Rabindranath in the garb of the classical speech of India would be quite considerable.

These translations are not all of the same merit. I, myself, am not competent to give comparative estimate of these. Here is one rendering from one of the most intriguing dramas of Rabindranath—the "Muktadhārā"—a work entirely in the modern spirit, although is allegorical in form. Professor Dhyanesh Narayan Chakrabarti, M. A., Sahitya-Sastri, who is lecturer in Sanskrit and Rabindra literature in the new University in honour of Rabindranath, which has been started in Calcutta recently—the "Rabindra

Bharati University" and is intimately connected with the spread of Sanskrit in Bengal through the Calcutta Sanskrit Sahitya Parishad, and is an active worker to have Sanskrit recognised as one of the official languages, has given expression to his practical zeal for Sanskrit by translating this drama of Rabindranath into the language of the Gods. Judging from a glance through his work, I think this is a very fine translation which gives the spirit as well as the form and linguistic beauty of the original. The composition is in a very simple style, as would be inevitable when we think of the original also. I am sure, lovers of Sanskrit will find real pleasure when they will peruse this work or dip into it. Prof. Chakrabarti has to his credit another fine rendering of a similar allegorical drama by Rabindranath—one of his masterpieces, namely the "Dakghar" or "the Post Office". This was highly praised by many scholars of eminence. This Sanskrit translation of "Dakghar" was staged in Calcutta, and also played on the Radio, and this is very encouraging for modern Sanskrit studies and the development of a modern literature in Sanskrit.

I hope Prof. Chakrabarti's translation will be received well by the interested scholarly world, and I wish him further success in this matter.

S/d. Suniti Kumar Chatterji.
Emeritus Professor, Calcutta University ;
Chairman, Government of India Sanskrit Commission
(1956-57)
and Chairman, West Bengal Legislative Council.

Professor Dr. Satkari Mukherjee, M.A., Ph, D.
Ex-Ashutosh Professor, Calcutta University.
At present Director,
NAVA NALANDA MAHAVIHAR
P. O. Nalanda, Patna.

Date, 17-12-64

It gives me pleasure to observe that Sri Dhyanesh Narayan Chakrabarti, M.A., has rendered some of the dramas of Rabindra Nath Tagore into Sanskrit. Though Rabindra Nath does not stand in need of external aids to the propagation of his reputation, these translations help other people who are ignorant of Bengali to appreciate his genius. Regarded in this light Sri Dhyanesh Narayan deserves the gratitude of all right thinking persons. I am glad to observe that his Sanskrit is elegant and almost as sonorous as the original. I wish that he should continue his work in this line. He is entitled to recognition as an original Sanskrit writer. I wish him uninterrupted success in his mission.

Satkari Mukherjee

Dr. Hiranmaya Vandyopadhyaya, I.C.S., D.Litt.
Vice-Chancellor, Rabindra Bharati University.
Calcutta.

हिरण्मय वन्द्योपाध्याय

रवीन्द्रभारती-विश्वविद्यालयः
६/४, द्वारकानाथ ठाकुर लेन,
कलिकाता-७
२३ डिसेम्बर, १९६३

मुक्तधारोपाधिकस्य रवीन्द्रनाथरचितस्य नाटकस्य श्रीध्यानेशनारायण-चक्रवर्तिकृतः संस्कृतभाषायामनुवादो मया पठितः। उत्कृष्टोऽयमनुवादः। यथासम्भवमयं मूलस्यानुवर्ती सुखपाठ्यश्च। इयं सफलता चक्रवर्तिमहोदयानां संस्कृतभाषायामनन्यसाधारणीं व्युत्पत्तिं प्रमाणीकरोति। रवीन्द्रसाहित्यानुवाद-विषये महोदयानामनुरूपः प्रयासः सर्वथा प्रार्थनीयः।

हिरण्मय वन्द्योपाध्याय

Mahāmahopādhyāya Dr. Kālipada Tarkācārya
Research Professor, Govt. Sanskrit College, Calcutta.

ॐ हरिरोम्

विश्वकवि-रवीन्द्रनाथ-कविसार्वभौम-प्रणीतस्य

मुक्तधाराख्य-रूपकस्य

संस्कृतानुवादप्रशस्तिः ।

रवीन्द्रनाथेन कवीश्वरेण कृता प्रसिद्धा भुवि मुक्तधारा ।
यस्या विचित्रेण रसेन धीरा विमुग्धचित्ता नियतं भवन्ति ॥ १

तां वङ्गभाषामयमुक्तधारां ध्यानेशनारायण-चक्रवर्ती ।
अनूद्य वृन्दारकवाक्प्रपञ्चैर्महोपकारं जगतो व्यधत्त ॥ २

ये वङ्गभाषां न विदन्ति लोका विदेशजाताः सुरवाचि विज्ञाः ।
अतःपरं ते किल मुक्तधारामास्वाद्य तृप्ताः सुतरां भवेयुः ॥ ३

प्रस्तावनास्मिन्ननुवादकेन स्वयं निबद्धा सुगसैर्वचोभिः ।
यया भवत् संस्कृतरूपकस्य प्रपूर्तिरङ्गस्य विशेषभाजः ॥ ४

भाषानुवादे सुगमार्थसार्थां माधुर्ययुक्ता च बुधप्रिया च ।
कृष्टं यया संस्कृतपत्ररत्नमनूदितां तामनयत् प्रकाशम् ॥ ५

सङ्गीतकादावपि रम्यभाषा विपश्चितां तोषणमादधाति ।
मूलानुगामी प्रकृतानुवादे मूलस्य नैवापचितो रसश्च ॥ ६

ध्यानेशनारायण-चक्रवर्ती प्रदर्शयामास परं कृतित्वम् ।
अत्रानुवादे विबुधा हि येन प्रीतिं परां तत्र समाश्रयन्ते ॥ ७

गीर्वाणवाणी मधुरा तदास्यादनर्गलं संसदि लब्धजन्मा ।
सामाजिकान् विस्मयमुग्धचित्तान् करोति शक्तिस्तुति वावदूकान् ॥ ८

नाट्यप्रयोगादिषु तस्य दाक्ष्यं सामाजिकान् प्रीणयति प्रकामम् ।
रम्या गुणास्ते प्रकृतानुवादे भूरि प्रकर्षं किल नीतवन्तः ॥ ९

ध्यानेशनारायण-चक्रवर्तिनं गीर्वाणवाणी सुसमृद्धि-साधने ।
चिरं रतं वीक्ष्य सुतृप्तचेतसा तमाशिषा वर्द्धयते विदां गणः ॥ १०

सुदीर्घमायुर्लभतां निरामयं स कर्मशक्तिं महतीञ्च विन्दताम् ।
तस्त प्रयत्नेन सुपर्वभारती समृद्धिमायातु किलोत्तरोत्तरम् ॥ ११

एषोऽनुवादः प्रतिगेहचारी लोकान् विधत्तां सुरवाचि रक्तान् ।
येनानुकूल्यं किल भारतेऽस्मिन् स्याद्राष्ट्रभाषात्वविधौ हि तस्याः ॥ १२

तदीयगुणमुग्ध—
(महामहोपाध्याय) श्रीकालीपद-तर्काचार्यस्य
१६।३।६४

Panditarāja Dr. Śrījīva Nyāyatīrtha, M.A. D.Litt.
Ex-Professor, Calcutta University.
Principal, Bhatpara Sanskrit College

श्रीः

प्रशस्तिपत्रम्

मुक्ताधारा रसानां तुहिनगिरिनिभाद् या रवीन्द्रात् कवीन्द्रात्
सा श्रीध्यानेशनारायण-सुरवचसानूदिता "मुक्तधारा"।
शङ्खध्वानेन भगीरथकरकलितेनेव नीता प्रसारं
पीता सद्भिर्विधत्तां तरुणकवयितुः सा कृतिः कीर्तिभारम् ॥

सतत-शुभानुध्यायिना
भट्टपल्लीवास्तव्येन
श्रीश्रीजीवन्यायतीर्थदेवशर्मणा
प्रदत्तम् ॥

Śāstraratnākara, Vidyāsāgara, Vidyāvācaspati,
Padmābhuṣaṇa

P. N. Pattabhiram Sāstrī
Reader in Sanskrit,
University of Calcutta

1, Deshapriya Park Road
Calcutta-26

27-10-63

श्रीः

श्रीध्यानेशनारायण-चक्रवर्तिमहोदयेन रवीन्द्रभारती-विश्वविद्यालयाध्यापकेन विरचितं 'मुक्तधारा' नामकं नाटकं मया विलोकितम्। इदञ्च जगति लब्धप्रतिष्ठानां कविकुलललामभूतानां श्रीरवीन्द्रमहोदयानां "मुक्तधारायाः" संस्कृतानुवादरूपम्। श्रीरवीन्द्रनाटकस्यायं संस्कृतानुवाद इदम्प्रथमतया श्रीचक्रवर्तिमहोदयेन कृतः। यादृशी शैली श्रीरवीन्द्राणां तामेव यथायथ-मवलम्ब्य सरसैर्मधुरैश्च शब्दैर्विरचितमिदं मनीषिणां मनांस्यावर्जयतीति सुदृढरूपं विश्वसिमि। संस्कृतभाषया नाटकादिलेखनक्रमो बहोःकालाल्लुप्त-प्रायेऽस्मिन् समय एतादृशग्रन्थानामाविष्कारस्संस्कृतप्रचाराय संस्कृसमाजाय च महते लाभाय स्यादिति सम्भावयामि। भाषान्तरे विद्यमानानां योग्यानां ग्रन्थानां संस्कृतानुवादे प्रवृत्तिशीलानामीदृशानां विदुषां प्रोतसाहनाय सर्वकारः अन्ये च संस्कृतानुरागिण आढ्या यदि ग्रन्थानामीदृशानां प्रकाशने दत्तचित्ता भवेयुस्तर्हि संस्कृतवाङ्मयस्य सुमहत्परिवर्द्धनं पोषणञ्च स्यादिति तर्कयामि। शोभनेऽस्मिन् कर्मणि प्रवृत्तिमावहन्तं श्रीध्यानेशमहोदयं हृदयेन प्रशंसमानो मदीयामिष्टदेवतामभ्यर्थये—यदयं पण्डितवरो भूयोभूयः परिश्रम्यैतादृशानि शुभानि कार्याणि कुर्वाणश्चिरं नीरोगदृढगात्रस्सुखेन जीयादिति।

पी. एन्. पट्टाभिरामशास्त्री

विषयानुक्रमणिका

CONTENTS

मुक्तधारा

प्रस्तावना

(नान्दी) यः काव्यै-र्मणि-माल्य-गीति-कमलैः सम्पूज्य वागीश्वरीं
लेभे विश्वजनार्घ्यरत्नममलं कीर्तिस्रजा मण्डितः ।
प्राच्यं पश्चिमकं प्रदीप्य किरणैर्योऽभूत् सतां वन्दित-
स्तं वन्दे कविसार्वभौममनिशं नाथं रवीन्द्राह्वयम् ॥

रवीन्द्रनाथः कविसार्वभौमको
गिरां पतिर्यः कविकुञ्जकोकिलः ।
अपास्तमृत्युः सितकीर्तिमण्डनो
विभातु शश्वद् वसुधा-प्रदीपनः ॥

सूत्रधारः—अहो आनन्दो नु आनन्दः । प्रागेव सर्वकर्मनिपुणां मनोरमां नटीं मे आह्वयामि ।

(मञ्चस्य पार्श्वैकदेशं गत्वा) आर्ये, यदि नेपथ्यविधानम् अवसितमित-स्तावदागम्यताम् ।

नटी—(प्रविश्य) आर्य, किमर्थमाहूतास्मि ? कः सन्देशः ?

सूत्रधारः—प्रिये, अद्य खलु तावत् कविसार्वभौमस्य रवीन्द्रनाथस्य जन्मशतवार्षिकीमुपलक्ष्य तेनैव महाकविना विरचितस्य मुक्तधारेति प्रख्यात-नाटकस्य संस्कृतानुकल्पनमस्माभिः कलिकातासंस्कृतसाहित्य-परिषत्-सदस्यैरभिनीयते ।

नटी—आर्य, कथं संस्कृतानुकल्पनं, केन चानूदितं तत् ?

सूत्रधारः—कविसार्वभौमेण जीवने काव्ये च या खलु शाश्वती भारतीया संस्कृतिर्वन्दिता नन्दिता प्रचारिता च, सा तु संस्कृतभाषाश्रिता । परन्तु, इयं सुरवाणी सामग्रिकभारतीयसंस्कृतेश्चिरन्तनी धात्री । निखिलभारतस्य सर्वेषां प्रदेशानां बन्धनरज्जुरियं सुरभारती विश्वभाषारूपेणापि स्वीकृता ।

नटी—बुद्धं मया सर्वमेव । अतः खलु भारतवर्षस्य प्राचीनमनीषिणः श्रीमच्छंकराचार्य-श्रीचैतन्यदेवप्रमुखा अस्माकं पूर्वसूरयः निखिले भारते संस्कृतभाषयैव तेषां भावधारां प्रचारितवन्तः ।

सूत्रधारः—नूनमेव। अतो निखिले भारते तथाखिले जगतीतले रवीन्द्र-भावधाराप्रचारणेऽपि संस्कृतमेव योग्यतमा भाषा। अतः खलु—

तत्काव्यं मधुनिर्झरोपममिदं विद्वज्जनानन्ददं
चित्वा वै करुणारसैककथिकां भावोच्छलां मर्मणः।
चक्रे संस्कृतभाषयानुरचितं नाट्यानुवादं कवेः
श्रीविश्वेश्वरदेवशर्मतनयो ध्यानेशनारायणः॥

[इति प्रस्तावना]

[पार्वत्यप्रदेश उत्तरकूटः। तत्रैव उत्तरभैरव-मन्दिरं प्रति प्रसारितः पन्थाः। विदूरे गमनमार्गे कस्यचिदभ्रभेदि-लौहयन्त्रस्य शीर्षदेशः सन्दृश्यते। ततश्चापरस्यां दिशि दृश्यते भैरवमन्दिरशिखरस्य त्रिशूलम्। मार्गस्य पार्श्वत आम्रकानने राज्ञो रणजितः शिविरसन्निवेशः। अमावस्यायामद्य भैरवमन्दिरे भविष्यति आरात्रिकम्। राजा पदव्रजेण तत्र गमिष्यति; पथि शिविरे विश्रामं लभते। तस्य सभायाः यन्त्रराजो विभूतिः बहुवर्षव्यापिन्या प्रचेष्टया लौहयन्त्रेण बन्धनं निर्माय मुक्तधाराख्यां स्रोतस्विनीं रुद्धवान्। अतुलनीया-मिमां कीर्तिं पुरस्कर्तुम् उत्तरकूटाधिवासिनः सर्वे उत्सवार्थं भैरवमन्दिरप्रांगणं प्रति प्रचलन्ति। भैरवमन्त्रदीक्षिताः सन्न्यासिनः अखिलं दिवसं स्तवगीतिं गायन्तः परिभ्रमन्ति। तेषां कस्यापि करे धूपाधारे प्रज्वलति धूपः, कस्यापि हस्ते शङ्खः; कस्यापि हस्ते गानस्य अन्तरान्तरं ध्वनति च तालपूर्वकम् घण्टा।]

(गानम्)

जयतु भैरव! जयतु शंकर!
जयतु जयतु प्रलयंकर
शंकर शंकर!
जयतु संशयभेदन
जयतु बन्धनच्छेदन
जयतु संकटसंहर
शंकर शंकर!

[पूजार्थं नैवेद्यं संगृह्य प्रविशति कश्चिद् वैदेशिकः। उत्तरकूटस्य नागरिकं स पृच्छति।]

पथिकः—आकाशतटमभि किमिदं निर्मितम्? दर्शनादस्य भीतिः समुत्पद्यते।

नागरिकः—नैतज्जानासि? मन्ये वैदेशिकस्त्वम्। एतत्तु यन्त्रम्।

पथिकः—यन्त्रमिदं किमर्थं विरचितम्?

नागरिकः—पञ्चविंशतिवर्षाणि व्याप्य अस्माकं यन्त्रराजेन विभूतिना यन्निर्मितं तदेव समाप्तीकृतम्, तदर्थमेवाद्य उत्सवविशेषः।

पथिकः—यन्त्रेण किं प्रयोजनम्?

नागरिकः—मुक्तधाराख्या निर्झरिणी तेनैव निरुद्धा।

पथिकः—अहो, असुरस्य मुण्डमिव तत् दृश्यते, नास्ति मांसम्, आनतश्चास्य हनुदेशः। युष्माकम् उत्तरकूटस्य शीर्षोपान्ते इत्थं मुखव्यादानं कृत्वा दण्डायमानमास्ते। अहर्निशं तु विलोक्य युष्माकं प्राणपुरुषो शुष्कं काष्ठमिव संजनिष्यते।

नागरिकः—अस्माकं प्राणपुरुषः सुदृढ़ एव वर्तते। तन्नास्ति चिन्ता-कारणम्।

पथिकः—तदेव भवेत्। अपि तु न हि समुचितस्तपनतारकाणां पुरतश्चास्य सम्प्रसारः ; एतद्धि समाच्छादनीयम्। न पश्यसि किम्, अहोरात्रम् कृतघ्नम् आकाशमण्डलं रोषयतीति?

नागरिकः—तद् भद्र! भैरवस्य आरात्रिकमालोकयितुं किमद्य न गमिष्यसि?

पथिकः—आरात्रिकदर्शनार्थमेव मया वहिर्गतम्। प्रतिवर्षम् अस्मिन्नेव समये मया आगम्यते। किन्तु, मन्दिराद् ऊर्ध्ववर्तिनि गगनमण्डले ईदृशः प्रतिरोधो न कदापि मया दृष्टः। हठाच्चैतत् पश्यतो मे रोमहर्षः सञ्जातः। मन्दिरशीर्षं यदनेन उल्लङ्घितं तन्मे स्पर्धेव प्रतिभाति। यातु, नैवेद्यमुपनीय प्रत्यागच्छामि। किन्तु, मनो मे न हि प्रसीदति। (प्रस्थानम्)

[काचिन्महिला प्रविशति। शुभ्रमुत्तरीयमेकं तस्याः मस्तकं परिवृत्य सर्वाण्यङ्गानि च समावृत्य भूतले लुठति।]

नारी—सुमन, वत्स सुमन! (नागरिकं प्रति) वत्साः, सुमनो मे नाद्यापि प्रत्यागतः।

नागरिकः—कासि त्वम्?

नारी—अहन्तु जनाइ-ग्रामस्य अम्बा। स तु मे नयनालोकः, मम प्राणानां निःश्वासः, मम सुमन!

नागरिकः—भोः, तस्य किं सञ्जातम्?

अम्बा—कुत्र स नीतः, नाहं जानामि। पूजार्थं मया भैरवमन्दिरं गतम्—प्रत्यावृत्याहं पश्यामि नास्ति सः, कुत्रापि नीत इति।

नागरिकः—तर्हि मुक्तधारायाः प्रतिरोधरचनार्थं स नीतो भवेत्।

अम्बा—मया तु श्रुतम्—अनेन पथा स नीतः—अस्माद् गौरीशृङ्गात् पश्चिमतः—तत्र दृष्टिर्मे न गच्छति। पश्चात् तस्मात् न हि दृश्यते मार्गान्तरम्।

नागरिकः—अलं विलापेन। आरात्रिकं द्रष्टुकामा वयं भैरवमन्दिरं प्रचलामः। अद्यास्माकम् आनन्दमयोऽवकाशः, त्वमपि तावदागच्छ।

अम्बा—न हि तात, पुरैकदा भैरवस्य आरात्रिकं द्रष्टुमहं गतवती। किन्तु, तद्दिनादेव पूजार्थं गमने चित्तं मे आशङ्कते। श्रूयतां, त्वामहं ब्रवीमि—अस्माकमर्चनं देवसकाशं न गच्छति। पथि एव तद् अपह्रियते।

नागरिकः—केन?

अम्बा—येन अपहृतो मे वत्सः सुमनस्तेनैव। कोऽसाविति नाधुना मयोपलब्धम्। सुमन, तात सुमन, मम वत्स सुमन! (उभयोः प्रस्थानम्)

[उत्तरकूटयुवराजेनाभिजिता यन्त्रराजं विभूतिं प्रति प्रेषितः कश्चिद् दूतः। विभूतिर्यदा मन्दिरं प्रचलति तदैव दूतेन सह तस्य साक्षात्कारः।]

दूतः—यन्त्रराज, युवराजेन प्रेषितोऽस्मि।

विभूतिः—कस्तस्य आदेशः?

दूतः—एतावत्कालम् अस्माकं मुक्तधारानिर्झरिणीम् अवरोधयितुम् त्वं बन्धनिर्माणे प्रवृत्तोऽसि। पुनः पुनस्तद्बन्धनं भग्नं जातं, तेन बहवो जनाः धूलिवालुकाभिरवरुद्धाः समाधिं गताः, कति कति च प्लावनात् स्रोतसा दूरं नीयमाना विलयं गताः। अद्यत्वे तु अन्ते मे—

विभूतिः—तेषां प्राणोत्सर्गो न कदापि व्यर्थीभूतः। अवसितं मे बन्धनिर्माणम्।

दूतः—शिवतलाधिवासिनः प्रजाजना नाधुनापि वार्तामिमां जानन्ति

दैवतेन यज्जलं तेभ्यः कृते प्रवाहितं, केनापि मनुष्येण तन्निरुध्यते इति विश्वसितुमपि ते न कदापि शक्नुवन्ति।

विभूतिः—दैवतेन तेभ्यः केवलं जलमेव प्रदत्तम्, मह्यं तु प्रदत्ता स्रोतोबन्धनार्थं शक्तिः।

दूतः—ते हि निश्चिन्ता वर्तन्ते, न जानन्ति यत्—सप्ताहानन्तरमेव तेषां कृषिक्षेत्रम्—

विभूतिः—कृषिक्षेत्रमुद्दिश्य किं वक्तुमिच्छसि ?

दूतः—तस्य क्षेत्रस्य विशुष्कीकरणमेव किं न ते बन्धननिर्माणे लक्ष्यभूतमासीत् ?

विभूतिः—वालुका-प्रस्तर-जलानां कापट्यं व्यर्थीकृत्य मनुष्यबुद्धिस्तु विजयतामिति मे उद्देश्यमासीत्। किं च कस्यापि कृषीवलस्य किमपि यवक्षेत्रम् विनङ्क्ष्यतीति तदा नासीन्मे चिन्तावकाशः।

दूतः—युवराजः पृच्छति किमिदानीमपि चिन्ताकालो नायात इति ?

विभूतिः—न हि, यन्त्रशक्तेर्महिमैव मया चिन्त्यते।

दूतः—क्षुधार्तस्य क्रन्दनेन किं सा चिन्ता न विदीर्णा भविष्यति ?

विभूतिः—न हि, जलवेगेन बन्धनं मे न कदापि भग्नीभवति, क्रन्दनप्रभावेणापि यन्त्रं मे न विचलति।

दूतः—किं नास्ति ते अभिशापभयम् ?

विभूतिः—अभिशापः ? शृणु तावत्, उत्तरकूटे यदा श्रमिकाणाम् अभावः सञ्जातस्तदा राजादेशेन चण्डपत्तनस्य प्रतिगृहादेव अष्टादशोर्द्ध्ववयस्कास्तरुणाः समानीताः। तेषां तु बहव एव न प्रत्यागताः। तत्रत्यानां बह्वीनां मातॄणामभिशापं व्यर्थीकृत्य यन्त्रं मे विजयते। दैवशक्त्या यो युध्यते, मनुष्याभिशापात् किं स बिभेति ?

दूतः—युवराजेनोक्तम्—कीर्तिप्रतिष्ठाया गौरवन्तु संलब्धमेव। अधुना आत्मनः कीर्तिभङ्गस्य यदधिकतरं गौरवं तदेवाधिकुरुष्व।

विभूतिः—कीर्तिप्रतिष्ठा यावन् न समाप्ता तावदासीत् चैषा मदायत्ता। अधुना सा उत्तरकूटवासिनां सर्वेषामेव अधिकारभूता। अतो नास्ति मे नाशाधिकारः।

दूतः—युवराजेनोक्तम्—नाशाधिकारस्तेनैव ग्रहीष्यते।

विभूतिः—उत्तरकूटस्य युवराजः स्वयमेव एवं ब्रवीति ? न किमस्मदीय-स्तत्रभवान् ? किमसौ शिवतलपत्तीयः ?

दूतः—तेनोच्यते—उत्तरकूटे न केवलं यन्त्रस्य राजत्वम्—तत्र देवोऽपि विराजते—इति निश्चितमेव प्रमाणयितव्यम् ।

विभूतिः—यन्त्रस्य अधिकारेण देवतापदं स्वयमेव ग्रहीष्यामीति प्रमाण-भारो ममैव । उच्यतो युवराजः, यन्मम वन्धनयन्त्रस्य मुष्टिपरिमितस्यापि अंशस्य ईषदुन्मोचनार्थं मया न कोऽपि पन्थाः उन्मुक्तः इति ।

दूतः—यः खलु देवो ध्वंसस्य कर्ता, स हि प्रशस्तमार्गेण सदैव न प्रचलति । वर्तन्ते तस्य ये तावद्रन्ध्रपथास्तेषु न केषामपि दृष्टिर्निपतति ।

विभूतिः—(भीतः सन्) रन्ध्रम् ? तत्तु किम् ? कां तावद् रन्ध्रस्य वार्तां त्वं जानासि ?

दूतः—किमहं जानामि ! यस्य प्रयोजनं स एव ज्ञास्यति । (प्रस्थानम्)

[उत्तरकूटस्य नागरिका उत्सवार्थं मन्दिरं गच्छन्ति ।]

(विभूतिं दृष्ट्वा)

प्रथमो नागरिकः—भोः यन्त्रराज, चतुरोऽसि त्वम् । चातुरीवलेन कदा तु प्रागेव समागतोऽसि इति किञ्चिदपि मया न ज्ञातम् ।

द्वितीयः—तस्मिन् कर्मणि तु स चिरमेव अभ्यस्तः । अन्तरालमधिष्ठाय शनैः शनैः प्रसृत्य कदा स सर्वान् अतिक्रम्य गच्छतीति न ज्ञायते । सोऽसौ अस्माकं चवुयाग्रामस्य मुण्डितो विभूतिः, अस्माभिः साकमेव गुरुदेव—कैलाससकाशात् कर्णपीडनमनुप्राप्य कदा तु अस्मात् सर्वानतिक्रम्य ईदृशं सुमहत् कार्यं साधितवान् !

तृतीयः—रे गवरो, मञ्जूषाहस्तः कथं विमूढो दण्डायमानस्तिष्ठसि ? प्रत्यक्षतः किं विभूतिस्त्वया न कदापि दृष्टः ? आनीयन्तां माल्यानि, तैर्भूषयामि तावत् ।

विभूतिः—आस्तां तावत् । प्रयोजनेनालम् ।

तृतीयः—नालं किम् ? अकस्मात् त्वमतीव महान् एव संवृत्तः । अतो यदि ग्रीवादेशस्ते उष्ट्रकण्ठमिव सुदीर्घश्चाभविष्यत्, उत्तरकूटवासिनः सर्वे सम्मिलिताः सन्तस्तव कण्ठोपरि माल्यभारं समर्पयिष्यन् चेत्, तदा शोभनमेव स्यात् ।

द्वितीयः—भ्रातः, ढक्कावादनकारी हरीशस्तु नाधुनापि समागतः।

प्रथमः—दुष्टोऽसौ अलसानां नायकः—तस्य पृष्ठचर्मणि यदि ढक्काघातः प्रदीयते, तदा—

तृतीयः—अलमनेन। ढक्कायां तालप्रदाने तस्य हस्तौ अस्मत्-करयुगलात् दृढतरौ।

चतुर्थः—विशाइ-सामन्तस्य रथं संप्रार्थ्य समानीय अद्य मे अग्रजोपमस्य विभूतेर् रथयात्राम् उद्यापयिष्यामि इति मे मनसि प्रकल्पितमासीत्। किन्तु श्रूयते नरपालोऽपि पदव्रजेनाद्य मन्दिरं गमिष्यति।

पञ्चमः—साधु साधु। सामन्तस्य रथस्य या खलु दशा। स हि रथो दशरथकल्पः—अकस्मात् मार्गमध्ये दशधा विभक्तो भवति।

तृतीयः—हाः हाः हाः! दशरथः। अस्माकं लम्बुः प्रायशः सुष्ठु भणति। दशरथः

पञ्चमः—मया किं विना कारणमेव ईदृशमुच्यते। पुत्रस्य मे विवाहकाले रथं तं संप्रार्थ्य अहम् आनीतवान्। यावदारोहितं, ततोऽप्यधिकतरं कृतं रज्जुसमाकर्षणम्।

चतुर्थः—तावत् क्रियतामिदम्। विभूतिं स्कन्धोपरि संस्थाप्य नयामः।

विभूतिः—अरे, अरे; किं क्रियते, किं क्रियते!

पञ्चमः—नहि, नहि, इदमेव काम्यते। उत्तरकूटस्य क्रोडे तव जन्म। अपि तु, त्वमद्य तस्य स्कन्धदेशं समारूढः। किञ्च, मस्तकं ते सर्वान् अतिक्रम्य ऊर्द्ध्व गच्छति।

[स्कन्धोपरि दण्डान् सज्जीकृत्य तदुपरि विभूतिम् उत्तोल्य]

सर्वे—विजयतां यन्त्रराजो विभूतिः। विजयतां यन्त्रराजो विभूतिः।

(गानम्)

यन्त्राय नमो नमः, यन्त्राय नमो नमः, नमामो यन्त्रम्।

चक्रमुखर-मन्द्रितस्त्वं हे वज्रवह्निवन्दित।
त्वं वस्तु-विश्व-वक्षोदंशः, ते ध्वंस-विकट-दन्तः॥
त्वं दीप्त-वह्नि-शत-शतघ्नी विघ्न-विजय-मार्गः।
लौहगलन-शैलदलनस्तवाचल-चलनो मन्त्रः॥

कदा काष्ठेष्टक लोष्ट्रकदृढ-घन-पिनद्ध-काया ।
भूतल जल-व्योममण्डल-लङ्घनलघु-माया ॥
तव खनि-खनित्र-नख-विदीर्णा क्षितिविकीर्णान्त्रा ।
तव पञ्चभूत-बन्धनकरा इन्द्रजालतन्त्राः ॥

[विभूतिना साकं सर्वे प्रस्थिताः । उत्तरकूटाधिपतिः रणजित्, तस्य च मन्त्री शिविरसन्निवेशात् मञ्चं प्रविशतः ।]

रणजित्—शिवतलस्य प्रजागणान् केनाप्युपायेन वशीकर्तुं नाशक्नोस्त्वम् । व्यतीतेष्वेतेषु दिनेषु मुक्तधाराजलमायत्तीकृत्य तान् वशीकर्त्तुमुपायो विभूतिना प्रदर्शितः । किन्तु, मन्त्रिन्, त्वयि तु तावन्न लक्ष्यते तादृशः समुत्साहः । किमत्र ईर्ष्याकारणम् ?

मन्त्री—महाराज, क्षमस्व माम् । खनित्र-कुद्दालकहस्तेन मृत्तिकाप्रस्तरेण सह द्वन्द्वयुद्धं नास्माकं कार्यम् । राष्ट्रनीतिरेव अस्माकमस्त्रम् ; मनुष्यमानसैस्तु अस्माकं व्यवहारः । शिवतलस्य शासनभारो युवराजोपरि समर्पणीय इति मन्त्रणा मयैव प्रदत्ता । तेनैव यद्बन्धनं सुरचितं स्यात्, न खलु तत् नगण्यम् ।

रणजित्—तेन किं फलं प्राप्तम् ? वर्षद्वयं यावद् राजस्वं तैर्न प्रदत्तम् । ईदृशं दुर्भिक्षं तत्र सदैव संघटते । तेन तु न भवति राजस्वं कदाप्यलब्धम् ।

मन्त्री—राजस्वादपि महार्घं किञ्चित् संलभमानमासीत्—एतस्मिन्नेव समये तस्य प्रत्यावर्तनं भवता समादिष्टम् । राजकार्ये क्षुद्रास्तु कदापि नावज्ञेयाः । जानीहि तावत्, यदा असहनीया अवस्था सञ्जायते, तदा दुःखस्यैव शक्त्या क्षुद्रास्तु समतिक्रम्य महतो भवन्ति महत्तराः ।

रणजित्—मन्त्रणायास्ते सुरालापनं प्रतिक्षणमेव परिवर्तते । कति वारान् त्वया उक्तं—ऊर्द्ध्वमारुह्य अधोदेशीयानां परिपीडनम् अनायासकरम् ; अपि तु वैदेशिकानां प्रजानां तादृशं पीडनमेव राजनीतिरिति । किं त्वया नैतदुक्तम् ?

मन्त्री—उक्तमेव मया । तदा तु अवस्था नैतादृशी आसीत् । कालानुकूलाऽभूत् मदीया मन्त्रणा । अधुना तु—

रणजित्—युवराजं शिवतले प्रेषयितुं नासीन्मे प्रक्षीणापि वासना ।

मन्त्री—कथं महाराज ?

रणजित्—ये खलु प्रजाजना विदूरवर्तिनस्तान् निकषा पुनः पुनर्गत्वा हार्दिकः सम्बन्धः स्थाप्यते चेत् तदा तु तिरोहिता भवति तेषां भीतिः। प्रीतिदार्शनेन प्राप्यते आत्मजनः, इतरो गृह्यते भीतिप्रदर्शनेन।

मन्त्री—प्रभो, युवराजस्य शिवतलप्रेषणे मौलिकं कारणं भवता विस्मृतम्। कति दिनानि यावत् तस्य मनस्तु व्याकुलं दृष्टम्। सञ्जातश्चास्माकं सन्देहो यद्, राजप्रासादे नैव तस्य जन्म, मुक्तधारानाम्नी या खलु निर्झरिणी, तस्यास्तटदेशादेव अज्ञातकुलशीलोऽसौ समानीत इति केनापि सूत्रेण तेन परिज्ञातम्। अतस्तं विस्मारयितुं—

रणजित्—तत्तु जानामि। इदानीन्तु स प्रायश एव रात्रौ निःसङ्ग एव निर्झरं निकषा गत्वा अशेत। वार्तां प्राप्य एकदाहं रात्रौ तत्र गतवान्, पृष्टवांश्च तं—वत्स अभिजित्, किं ते जातम्, कथमत्र अवस्थीयते? तेन प्रत्युक्तम्—अस्य जलस्य कलध्वनौ मदीयां मातृभाषामहमाकर्णयामीति।

मन्त्री—अहं तं पृष्टवान्—युवराज, किं ते जातम्? राजप्रासादे कथं प्रायशस्त्वं नाधुना दृश्यसे? तेनोक्तं—पृथिव्यां पथिरचनार्थमेव आगतोऽस्मीति वार्ता मया सम्प्राप्ता।

रणजित्—आयुष्मतस्तस्य राजचक्रवर्तिलक्षणं विद्यत इति विश्वासो मे तिरोभवति।

मन्त्री—येन खलु अस्य दैवलक्षणस्य वार्ता घोषिता, तत्रभवान् अभिरामस्वामी तु महाराजस्य गुरोरपि गुरुः।

रणजित्—तत्रभवता प्रमादः कृतः। तत्प्रसङ्गस्तु केवलं हानिं साधयति। शिवतलस्य पशुलोमानि यथा विदेशस्य हट्टेषु न वहिर्गच्छेयुः, एतदर्थमेव पितृपितामहानां शासनकालादारभ्य निरुद्धो नन्दिसंकटस्य पन्थाः। अभिजित् तमेव पन्थानम् उन्मोचयति। अनेन उत्तरकूटस्य अन्नवस्त्राणि भविष्यन्ति दुर्मूल्यानि।

मन्त्री—यतो वयसा नवीनः, युवराजः केवलं शिवतलादेव—

रणजित्—अपि तु, स्वजनानां विरुद्धे एवायं विद्रोहः। धनञ्जय-नामधेयः शिवतलस्य यः खलु सन्न्यासी प्रजाजनान् समुत्तेजयति, तस्यैव पक्षे नूनं सोऽपि वर्तते। इदानीं कश्चिठमण्डितस्य तस्य कण्ठदेशः पेषणीयः। स खलु कारारुद्धः करणीयः।

मन्त्री—महाराजानुशासनस्य प्रतिवादे नास्ति मे साहसम्। इदन्तु ज्ञायते भवता यद् एतादृशा दुर्योगाः दृश्यन्ते, येषां रोधकरणात् मोचनमेव वरम्।

रणजित्—अस्तु तावत्, तस्मिन् विषये मा चिन्तय।

मन्त्री—नाहं चिन्तयामि। महाराजस्तु चिन्तयतु एतदेव मे प्रार्थनम्।

[प्रतिहारी प्रविशति]

प्रतिहारी—अदूरे तिष्ठति मोहनगृहस्य राजपितृव्यो विश्वजित्।

[प्रस्थानम्]

रणजित्—अपरः सोऽसौ। अभिजितः कलुषणो स एव नायकः। आत्मीयरूपी अनात्मीयस्तु मनुष्यककुद् इव। पश्चात् स्थास्यति, संलग्नः छेत्तुमपि न शक्यते, वहनमपि क्लेशकरम्। कुतः शब्दोऽयम्?

मन्त्री—भैरवसाधकाः मन्दिरप्रदक्षिणार्थं बहिर्गताः।

(भैरवसाधकानां प्रवेशो गानञ्च)

तिमिर-हृद्विदारण
ज्वलदग्नि-निदारुण
मरुश्मशान-सञ्चर
शंकर हे शंकर!

वज्रघोषा तव वाणी
हे रुद्र शूलपाणे
मृत्यु-सिन्धु-सन्तर
शंकर हे शंकर।

(प्रस्थानम्)

[प्रविशति रणजितः खुल्लतातो मोहनगृहाधिपतिर्विश्वजित्। शुभ्रकेशः शुभ्रवेशः शुभ्रोष्णीषः]

रणजित्—नमस्ते। तात, उत्तरभैरवमन्दिरे पूजानुष्ठाने योगदानार्थं त्वमद्य आगमिष्यसीति नासोन्मे प्रत्याशितम् एतादृशं सौभाग्यम्।

विश्वजित्—अद्य उत्तरभैरवः पूजां न ग्रहीष्यतीति विज्ञापयितुम् आगतोऽस्मि।

रणजित्—तव दुर्वाक्यमिदमद्यास्माकं महोत्सवम्—

विश्वजित्—किमर्थं महोत्सवः ! निखिलस्य विश्वेषां तृषितानां कृते देवदेवेन कमण्डलुमध्यात् या खलु जलधारा सर्वतः प्रवाहिता, सा मुक्तधारा कथं युष्माभिर्निरुद्धा ?

रणजित्—अरातिदमनार्थम्।

विश्वजित्—महादेवं प्रति वैराचरणे नास्ति ते भीतिः ?

रणजित्—यः खलु देव उत्तरकूटस्य पुराधिपतिः, अस्माकं विजयेन तस्यैव विजयः। एतदर्थमेव अस्मदीयपक्षम् अवलम्ब्य स देव आत्मनो दानं प्रत्याहृतवान्। तृष्णायाः शूलेन शिवतलं विद्ध्वा उत्तरकूटस्य सिंहासनमूले स निद्रां प्स्यति।

विश्वजित्—तर्हि, युष्माकं पूजनं न तु यथार्थतश्चार्चनं, तत्तु वेतनमेव।

रणजित्—तात, परेषां पक्षपाती, आत्मीयविरोधी त्वम्। तवैव शिक्षया अभिजित् स्वराज्यं स्वकीयरूपेण ग्रहीतुं न शक्नोति।

विश्वजित्—ममैव शिक्षया ? किन्त्वेकदाहं तवैव पक्षे नासम् ? प्रजानां सर्वनाशं संसाध्य यदा तु चण्डपत्तने त्वं विद्रोहं सृष्टवान्, स खलु विद्रोहो न खलु मया दान्तः ? अवसाने तु कदा नु बालकश्चासौ अभिजित् हृदयं मे प्राविशत्—आलोक इव प्रादुर्भूतः। तमसायां दर्शनसामर्थ्याभावात् यान् अहमाहतवान्, पश्चात् तान् स्वजनरूपेण अनुभूतवान्। राजचक्रवर्ति-लक्षणं दृष्ट्वा यं हि त्वं परिगृहीतवान्, उत्तरकूटस्य सिंहासने एव तं निरोद्धुं कामयसे ?

रणजित्—मुक्तधारा-निर्झर-तटे अज्ञातकुलशीलः परित्यक्तश्चाभिजित् समाहृतः—इत्येषा वार्ता तत्सकाशे त्वयैव ननु प्रकाशिता ?

विश्वजित्—बाढं, मयैव प्रचारितः सन्देशः। तस्मिन् दिवसे दीपालि-कोत्सवमुपलक्ष्यासौ आसीदस्माकं प्रासादे आमन्त्रितः। गोधूलिवेलायां गौरीशिखरं प्रति निबद्धदृष्टिरसौ एकाकी अलिन्दे दण्डायमानो मया अव-लोकितः पृष्टश्च—"किं पश्यसि, वत्स ?" तेनोक्तम्—"ये खलु पन्थानो नाद्यापि रचितास्तेऽपि भाविकालीनाः पन्थानो दुर्गमशैलोपरि सम्भाव्यमाना दृश्यन्ते—दूरं समीपमानेतुं कल्पितोऽयं पन्थाः। श्रुत्वा तदैव मे मनसि अजायत—मुक्तधाराया उत्सतटे कापि गृहहीना जननी तम् प्रसूतवती ; कस्तं निरोत्स्यति ? नातःपरं धैर्यधारणे शक्तोहम् ; उक्तं मया—वत्स, तव

जन्मलग्ने गिरिराजेन पथि एव विरचिता तव अभ्यर्थना, गृहं प्रति नामन्त्रितस्त्वं गृहशङ्खेन।"

रणजित्—अधुना मया सर्वमवगम्यते ?

विश्वजित्—किमवगतं त्वया ?

रणजित्—वार्तामिमामाकर्ण्य उत्तरकूटस्य राजगृहात् विच्छिन्नं जातम् अभिजितो ममत्वम्। तदेव स्पर्धया दर्शयितुं स नन्दिसंकटस्य मार्गम् उन्मोचितवान्।

विश्वजित्—तेन का हानिः ? यः खलु पन्था उन्मोचितः—स तु सर्वेषामेव—उत्तरकूटस्य शिवतलदेशस्य च।

रणजित्—तात, पितृव्यस्त्वमात्मीयो, गुरुजनश्च ; एतदर्थमेतावत्कालं यावद् रक्षितं धैर्यम्। नातःपरं क्षमोऽस्मि। स्वजनविद्रोही त्वम्, तद् राज्यमिदं परिहाय दूरं गच्छ।

विश्वजित्—नाहं परित्यक्तुं शक्तः। यदि, यूयं मां परित्यजथ, तदाहं तु सहिष्ये। (प्रस्थानम्)

[अम्बायं प्रवेशः]

अम्बा—(राजानं प्रति) भोः भोः, के यूयम् ? सूर्यस्तु अस्तं गच्छति, किन्तु सुमनो मे नाधुनापि प्रत्यागतः।

रणजित्—अयि, का त्वम् ?

अम्बा—नास्ति मे परिचयः। आसीत् यो मे जीवितसर्वस्वम् सोऽसौ अनेन पथा दूरं नीतः। अस्य पथः किं शेषो नास्ति। ननु, किम् इदानीमपि सुमनश्चलति, केवलमेव प्रचलति—यत्र गौरीशिखरमुल्लंघ्य पश्चिमायामस्तं गच्छति दिवाकरः, निलीयते आलोकच्छटा—निमज्जति सर्वमेव ?

रणजित्—मन्त्रिन्, इयं किम्—

मन्त्री—वाढं, महाराज, तद्बन्धनस्य निर्माणार्थम्—

रणजित्—(अम्बामुद्दिश्य) भद्रे, शोकं मा कुरु। अहं जानाम्येतत्-ननु—पृथिव्यां सर्वेभ्यश्चरमं यद्दानं पुत्रेण ते तदेव संलब्धमिति।

अम्बा—गते तस्मिन् सत्ये, तद्दानमानीय स सायंकाले मह्यम् अदास्यत्। ननु तस्याहं जननी।

रणजित्—स हि आनीय दास्यति। तन्नेदानीं सायं समायातम्।

अम्बा—वत्स, सत्यं भवतु ते वचनम्। अहं भैरवमन्दिरस्य पथि पथि प्रतीक्षां करिष्यामि। सुमन! सुमन!

[प्रस्थानम्]

[छात्रसंघेन सह उत्तरकूटस्य प्राथमिकविद्यालयशिक्षक आराद् वृक्षतले प्रविशति]

शिक्षकः—वेत्रं, वेत्रप्रहारं प्राप्स्यथः। समुच्चकण्ठेन उच्यन्तां—विजयतां राजराजेश्वरः।

छात्राः—विजयतां राजरा—

शिक्षकः—(समीपवर्तिनां छात्राणां कतिपयेषु मृदु कराघातं कृत्वा) जेश्वर।

छात्राः—जेश्वर।

शिक्षकः—श्रीश्रीश्रीश्रीश्री—

छात्राः—श्रीश्रीश्री—

शिक्षकः—(आहत्य) पञ्च वारान्।

छात्राः—पञ्च वारान्।

शिक्षकः—लक्ष्मीभ्रष्टाः, वानराः! उच्यन्तां सर्वैः—श्रीश्रीश्रीश्रीश्री—

छात्राः—श्रीश्रीश्रीश्रीश्री—

शिक्षकः—उत्तरकूटाधिपतिर्विजयताम्।

छात्राः—उत्तरकूटा—

शिक्षकः—धिपतिर्

छात्राः—धिपतिर्

शिक्षकः—विजयताम्।

छात्राः—विजयताम्।

रणजित्—युष्माभिः कुत्र गम्यते?

शिक्षकः—अस्माकं यन्त्रराजो विभूतिर्महाराजेनाद्य पुरस्कृतो भविष्यति। तेनानन्दोत्सवार्थं बालकैः सह गच्छामि। सञ्जाते उत्तरकूटस्य गौरवे शैशवादेव येनस्ते बालका गौरवमनुभवितुं शिक्षन्ते, तदर्थमेव न किञ्चिदपि उपलक्ष्यं परिहातुं कामये।

रणजित्—विभूतिना किं कृतमिति ननु सर्वैरेव एभि र्ज्ञायते?

बालकाः—(उल्लम्फ्य करतालं दत्वा) ज्ञायते ; निरुद्धं तेन शिवतलस्य पानीयजलम् ।

रणजित्—कथं निरुद्धम् ?

बालकाः—(सोत्साहम्) तान् विपन्नान् कर्तुम् ।

रणजित्—कारणं किम् ?

बालकाः—ते तु दुर्जनाः !

रणजित्—कथं दुर्जनाः ?

बालकाः—ते नूनं दुर्जनाः, अतीव दुर्जनाः—सर्वैरेव एतज् ज्ञायते ।

रणजित्—कथं दुर्जनाः—तत्तु किं न जानीथ ?

शिक्षकः—महाराज, जानान्त्येव । रे रे, किं युष्माभिर्न पठितम् ? पुस्तके किं न दृष्टम् ? तेषां धर्मस्त्वतीव निन्दित इति ।

बालकाः—सत्यम्, सत्यम् ; भृशं निन्दितस्तेषां धर्मः ।

शिक्षकः—किं च, ते तु अस्मादृशाः—भोः भोः उच्यतां सर्वैः (नासिकां प्रदर्श्य) ।

बालकाः—न हि उन्नतनासिकास्ते ।

शिक्षकः—भवतु, अस्माकं गणनाचार्येण किं प्रमाणीकृतम् ? नासिकायाम् उन्नतायां किं भवति ?

बालकाः—जात्या नितराम् उन्नतो भवति ।

शिक्षकः—ते तु किं कुर्वन्ति ? कथ्यताम्—पृथिव्याम्—उच्यताम्—किं न ते सर्वेषामुपरि विजयिनो भवति ?

बालकाः—सत्यम् ; विजयिनो भवति ।

शिक्षकः—उत्तरकूटस्य अधिवासिनः कदापि किं युद्धे पराजिताः ? किं जानीथ ?

बालकाः—कदापि न ।

शिक्षकः—अस्माकं महाराजस्य पितामहः प्राग्जित् त्रिनवत्यधिक-द्विशत-संख्यकैः सैनिकैः सार्द्धसप्तशताधिक-त्रिंशत्सहस्रसंख्यकान् दक्षिणागतान् बर्वरान् न किं विताडयामास ?

बालकाः—सत्यं, विताडितवान् ।

शिक्षकः—नूनमेव जानीहि महाराज ; उत्तरकूटात् वहिर्देशे ये खलु

भाग्याहताः मातृगर्भे जन्म स्वीकुर्वन्ति, एकदा एते एव बालकास्तेषु भविष्यन्ति विभीषिका रूपिणः। यद्येतन्न भवेत्, तदाहं मिथ्यैव शिक्षकः। कीदृशः सुमहान् कर्तव्यभारो अस्माश्वेव न्यस्तः—नैतत्तु मनागपि मया विस्मर्यते। वयमेव मानुषान् निर्माय दद्मः। भवन्त अमात्यास्तु तान् एव संगृह्य व्यवहरन्ति। अपि तु, किं वा ते प्राप्नुवन्ति, वयमपि वा किं प्राप्नुम इति तुलनां विधाय विचार्यताम्।

मन्त्री—किन्तु अमी छात्रा एव युष्माकं पुरस्कारः।

शिक्षकः—अतीव शोभनमुक्तं भवता। मन्त्रिमहोदय—छात्रा एव अस्माकं पुरस्कारः। अहो, खाद्यजातमतीव दुर्मूल्यम्—दृश्यतां तावत्—गव्यघृतम्—एकदा यस्य मूल्यमासीत्—

मन्त्री—अलमलम्, तव गव्यघृतस्य विषयमहं विचारयिष्यामि। गम्यतामिदानीम्। समायातः पूजनकालः।

[जयध्वनिं कारयित्वा छात्रैः सह शिक्षकस्य प्रस्थानम्]

रणजित्—तव गुरोरस्य करोटिकायां नास्ति अन्यत् किमपि घृतम्, गव्यघृतमेव वर्तते।

मन्त्री—पञ्चगव्यानामेकं नूनमस्त्येव। अपि तु, महाराज, कार्यसाधने प्रयोजनम् ईदृशैरेव मनुष्यैः। यादृशमेव समादिष्टं तादृशमेव स दिनाद् दिनानि समाचरति। बुद्धिप्रकर्षे सति कार्यं यन्त्रवत् न कदापि प्रचलति।

रणजित्—मन्त्रिन्, आकाशे किं तद् दृश्यते ?

मन्त्री—महाराज, असौ खलु विभूतिनिर्मिता यन्त्रचूडा—कथमेतत् विस्मर्यते ?

रणजित्—कदापि खल्वेषा ईदृशं स्पष्टं न दृश्यते।

मन्त्री—अद्य प्रातर्झटिकया निर्मलीभूतं गगनम्। अतः खलु दृश्यते स्पष्टम्।

रणजित्—किं पश्यसि, तस्याः पश्चादुदेति सूर्यः रोषदीप्त इव। पश्य, दानवस्य उद्यत-मुष्टिरिव सा दृश्यते। अस्यास्तादृशं समुन्नयनं न हि समुचितं जातम्।

मन्त्री—अस्माकमाकाशस्य वक्षसि शूलमेव विद्धम्—इत्येवं प्रतीयते।

रणजित्—इदानीं सम्प्राप्तो मन्दिरगमनकालः।

(उभयोः प्रस्थानम्)

[उत्तरकूटस्य द्वितीयनागरिकसंघस्य प्रवेशः]

प्रथमः—किं दृष्टम् ? अधुना विभूतिः अस्मान् परिहाय प्रचलति। स तु अस्माकं समाजे एव परिणतिं गत इत्येतद् इतिवृत्तं चर्मणो घर्षणेन स लोपयितुं चेष्टते। एकदा स उपलप्स्यतेति--यदि दीर्घतरो भवति कोषादसिस्तदा नावहति कल्याणमिति।

द्वितीयः---एतत्तु भ्रातः समर्थनीयं, विभूतिना उत्तरकूटः प्रख्यातिम् आपादित इति।

प्रथमः—छिद्यतामेषा कथा। तमुपलक्ष्य युस्माभिराधिक्यमेव प्रदर्श्यते। यद्बन्धननिर्माणे क्लेशात्तस्य जिह्वा बहिर्गता, तद्बन्धनं नूनगत्यां दशवारान् भग्नीभूतम्।

तृतीयः—पुनरपि बन्धनभङ्गो न भविष्यतीति को वा जानाति ?

प्रथमः—बन्धनादुत्तरस्यां दिशि यः स्तूपो, ननु किमसौ त्वया दृष्टः ?

द्वितीयः—कथं कथम् ? किं जातम् ?

प्रथमः—किं जातम् ? नैतज्जानासि ? येन दृश्यते, तेनैवोच्यते—

द्वितीयः---किमुच्यते भ्रातः ?

प्रथमः—किमुच्यते ? किं मूढस्त्वम् ? किम् एतदपि प्रष्टव्यम् ? समग्रमेव—किं तद् वक्ष्यामि—

द्वितीयः—तथापि, वर्णय तावद् व्यापारम्।

प्रथमः—रञ्जन, त्वया विस्मापितोऽस्मि। क्षणमपेक्षस्व, स्पष्टमेव अवगमिष्यसि—अकस्मात् यदा सम्पूर्णमेव—

द्वितीयः--सर्वनाशः ! किमुच्यते, भ्रातः ! अकस्मात् मूलत एव ?

प्रथमः—वाढं, भ्रातः, झगरूसकाशात् श्रोतुमर्हसि। स स्वयमेव परिमाप्य प्रत्यक्षीकृत्य प्रत्यागतः।

द्वितीयः—अस्त्येव झगरोस्तादृशो गुणः। तस्य मस्तिष्कं तु सुस्थिरम्। सर्वे यदा प्रोत्साहयन्ति, तदा स कुतोऽपि मानदण्डकां बहिरानयति।

तृतीयः—अस्तु भ्रातः, केचन वदन्ति यद् विभूते र्यत् खलु विद्याजातं, तत् सर्वम्—

प्रथमः—जानाम्यहम्, वेङ्कटवर्मसकाशाद् अपहृतम्। सत्यम्, आसीत्

स यथार्थतो गुणी। कीदृशी कल्पनातीता मनीषा! तथापि पुरस्कारं प्राप्नोति विभूतिः, अपरतः स वराकः खाद्याभावात् पञ्चत्वं गतः।

तृतीयः—केवलं किम् आहार्याभावादेव ?

प्रथमः—अरे, आहार्याभावात्, उत वा कस्यापि हस्तदत्तं किञ्चित् भुक्त्वेति —सन्देशेन तेन किं प्रयोजनम्। पुनश्च कः काभ्यो दिग्भ्यो—निन्दुकानाम् तु अभावो नास्ति। देशेऽस्मिन् मनुष्याणां कोऽपि कस्यापि कल्याणं न सहते।

द्वितीयः—युष्माभिर्यदेवोच्यते, तथाप्यसौ तु—

प्रथमः—अहो कथं तन् न भविष्यति ? विचार्यतां तावत् कस्यां भूमौ तस्य जन्म। तस्मिन् चवुयाग्रामे आसीन् मम प्रपितामहस्य आवास, तस्य नाम युस्माभिः किं श्रुतम् ?

द्वितीयः—अहो, तस्य नाम उत्तरकूटस्य को न जानाति ? स तु असौ— यत् किमुच्यते—

प्रथमः—आम्, आम्, भास्कर इति। नस्यनिर्माणे एतादृशो निपुणः शिल्पी अस्मिन् देशे न कदापि जातः। तस्य हस्तनिर्मितं नस्यं विना राज्ञा शत्रुजिता नातिवाहितः कश्चिदपि दिवसः।

तृतीयः—अनन्तरं तेषामालोचनं भविष्यति ; इदानीं मन्दिराभिमुखं प्रचलितव्यम्। वयन्तु विभूतेः स्वग्रामवासिनः। अस्माभिरानीतानि माल्यानि प्रागेव तेन ग्रहीतव्यानि। वयन्तु तस्य दक्षिणत एव आसनं ग्रहीष्यामः।

(नेपथ्ये—मा गच्छ, भ्रातर्मा गच्छ, प्रतिनिवर्तस्व तावत्।)

प्रथमः—श्रूयतां, वृद्धो वटुको वहिर्गतः।

(वटुकस्य प्रवेशः)

[गात्रे छिन्नं कम्बलं, हस्ते वङ्किमवृक्षशाखानिर्मिता यष्टिः, केशास्तु अविन्यस्ताः]

प्रथमः—भोः वटो, कुत्र गम्यते ?

वटुः—सावधानो भव, वत्स, सावधानो भव। तेन पथा मा गच्छ ; यथाकालं प्रत्यागच्छ।

द्वितीयः—कथम्, उच्यताम्।

वटुः—बलिं दास्यति, नरबलिम्। तरुणं मे पौत्रद्वयं बलपूर्वकं नीतवान्। न कदापि तौ प्रत्यावृत्तौ।

तृतीयः—खुल्लतात, कमुद्दिश्य बलिं दास्यति ?

वटुः—तृष्णां, तृष्णादानवीमुद्दिश्य बलिं प्रदास्यति ।

द्वितीयः—तृष्णा ? का सा ?

वटुः—सा यावत् खादति, तावदाकांक्षते । घृतभुग्वह्निशिखेव केवलमेव दीर्घायते तस्याः विशुष्का रसना ।

प्रथमः—उन्मत्तोऽसि ! अस्माभिस्तु गम्यते उत्तरभैरवमन्दिरम् । तत्र कुत्रास्ते तृष्णादानवी ?

वटुः—किं युष्माभि र्नाधुनापि वार्ता सम्प्राप्ता ? अद्य तावत् मन्दिराद् भैरवं विताडयितुं ते प्रचलन्ति । वेदिकायामभिषिक्ता भविष्यति तृष्णा ।

द्वितीयः—मा, मा, एतादृशं वाक्यं मा उच्चर । श्रुतिपथं गते ईदृशे वाक्ये उत्तरकूटस्य मनुष्यास्त्वां निहत्य खण्डीकरिष्यन्ति ।

वटुः—ते तु मे गात्रमुद्दिश्य निक्षिपन्ति धूलिजालम्, किशोरास्तावत् क्षिपन्ति लोष्टम् । सर्वे वदन्ति—पौत्रद्वयेन ते यत् प्राणाः प्रदत्तास्तत्तु तयोः सौभाग्यमेव ।

प्रथमः—ते तु मृषा वदन्ति ।

वटुः—मृषा न वदन्ति ? प्राणानां विनिमयेन न प्राप्यन्ते यदि प्राणाः, मृत्युना यदि मृत्युरेव अभ्यर्थ्यते, तदा एतादृशीं हानिं कथं भैरवः सहेत ? सावधानो भव । वत्स, सावधानो भव । तेन पथा न गन्तव्यम् ।

(प्रस्थानम्)

द्वितीयः—अग्रज, पश्यतु तावत्, गात्रे मे भीतिकण्टकं जायते ।

प्रथमः—रज्जो, त्वम् नितरां भीरुः ; तत्, चल, चल ।

(सर्वेषां प्रस्थानम्)

[युवराजस्याभिजितो राजकुमारस्य च सञ्जयस्य प्रवेशः]

सञ्जयः—राजप्रासादं परित्यज्य कथं त्वया अन्यत्र गम्यते इति नाऽहमवगच्छामि ।

अभिजित्—न शक्यसि त्वं सर्वमवगन्तुम् । मम जीवनस्रोतो राजगृहस्य पाषाणराशिमतिक्रम्य प्रवक्ष्यतीति वार्तां कर्णेकृत्य वसुन्धरामागतोऽहम् ।

सञ्जयः—कियद्दिनानि यावत्त्वामुदासीनं पश्यामि । अस्माभिः सार्द्धं यत् ते प्रेमबन्धनं मनसि शिथिलायमानं कृतं, किं नु तदद्य विच्छिन्नं जातम् ?

अभिजित्—अवलोकय तावत् सञ्जय, गौरीशिखरमुद्भासयन्तीम् अस्तायमान-तपनच्छविम्। मन्ये, कोऽसौ वह्निविहगो मेघपक्षं प्रसार्य निशिथिनीमभिलक्ष्य प्रचलति। मम पथयात्राचिह्नमिदमाकाशपटे अस्तसूर्येणाङ्कितम्।

सञ्जयः—राजपुत्र, न दृश्यते किम् असौ यन्त्रचूडा सूर्यास्तमेघानां वक्षो विदीर्य दण्डायमानस्ते इति ? यथैव उड्डीयमानो विहगो वक्षसि बाणविद्धः पक्षच्छदमधः प्रसार्य रात्रेर् गह्वरतटमभिपततीव। नैतन्मे रोचते। इदानीं समायातो विश्रामकालः। कुमार, प्रतिनिवर्त्यतां राजप्रासादः।

अभिजित्—यत्रास्ति प्रतिरोधः किमस्ति तत्र विश्रामः ?

सञ्जयः—प्रासादेष्वस्ति ते प्रातिकूल्यमिति अधुना गतेष्वेतेषु दिनेषु कथं त्वयावगम्यते ?

अभिजित्—मुक्तधारायां तैर्बन्धनं विहितमिति यदा श्रुतम्, तदैवोपलब्धम्।

सञ्जयः—नाहमवगच्छामि ते वाचो मर्मार्थम्।

अभिजित्—मर्त्यानामन्तर्गतं रहस्यं विधात्रा बहिर्विश्वे कुत्रापि लिखितम् रक्षितंच। मम मर्मवाणी तु विराजते मुक्तधारायाश्चान्तःस्तले। तस्या एव चरणयुगं यदा एभिः शृङ्खलितं तदैव सहसा सचकितमुपलब्धम्—उत्तरकूटानां सिंहासनमेव मे जीवनस्रोतसो बन्धनम् इति। निर्गतोऽहं पथिषु तस्यैव द्वारोन्मोचनाय।

सञ्जयः—कुमार, मामपि कुरु ते सहचरम्।

अभिजित्—न हि भ्रातः। आत्मपथस्त्वयैवात्मना अनुसन्धातव्यः। मामनुगच्छसि चेदहमेव तव पन्थानम् प्रच्छादयिष्यामि।

सञ्जयः—एतावदकरुणो मा भव। एतद्धि मां व्यथयति।

अभिजित्—अवगतोऽसि मे हृदयम्। तेन आहतोऽपि त्वं माम् अवगमिष्यसि।

सञ्जयः—कुतस्त्वमामन्त्रितः, कुत्र च चलसीत्यधिकृत्य नाऽहं किञ्चिदपि प्रष्टुमिच्छामि। किन्तु, युवराज, आसन्नायामस्यां सन्ध्यायां राजभवने वैतालिकाः यद्दिनावसानगीतिमारभन्ते—नास्ति किमस्यापि किण्याह्वानम् ? अस्तु वा काठिन्यस्य गौरवम्, किन्तु यन्मधुरं तस्याप्यस्ति मूल्यम्।

अभिजित्—भ्रातस्तस्यैव परिशोधार्थं काचिन्यस्येयं साधना।

सञ्जयः—अपि स्मर्यते किं यत् प्रत्यूषे पूजनार्थं यस्मिन्नासने त्वया

उपविश्यते पुरतस्तस्य श्वेतकमलं विलोक्य विस्मयं गतोऽसि ? जागरणात् ते प्रागेव कदानु प्रत्यूषे केनैतद् रहसि विचित्य समुपहृतम्, तेन हि आत्मा गोपायितः। किन्त्वेतत् किमिव सुधासिक्तम् तस्य स्मरणार्थं नास्ति किमद्य प्रयोजनम् ? तेन भीरुणा आत्मगोपनं येन कृतं, ननु स्वकीय-पूजनस्य गूहने येन न शक्तं, तस्य मुखं किं त्वया न स्मर्यते ?

अभिजित्—वाढं, स्मर्यते। तेनैव नार्हामि सोढुं वसुन्धरायाः संगीतं संरोध्य नभसि लौहदंष्ट्राविकाशपूर्वकमट्टहासं कुर्वाणं बीभत्सं तम्। स्वर्गं मे रोचते इति कारणेन दानवैः सह योद्धुं नास्ति मे कुण्ठा।

सञ्जयः—मूर्च्छति हि चैतन्नीलशैलशिखरे गोधूलिकिरणजालः। एतन्मध्यत एका विलापच्छविस्ते हृदयं किं न प्रविशति ?

अभिजित्—आम्, प्रविशति। ममापि वक्षस्तलं पूर्णं विलापेन। न मया रक्ष्यते काठिन्यस्य अभिमानम्। पश्य पश्य, असौ विहङ्गमो देवदारु-शाखायां निःसङ्गः समासीनः। नाहं जाने—किं चासौ कुलायं गमिष्यति, उतो वा तमसि प्रस्थास्यते दूरं प्रवासारण्यमिति। किन्तु यदसौ सूर्य्यास्त-नभस्तटं निरीक्षमाणो मौनं तिष्ठति तन्निरीक्षणरागिणी मर्मणि मे ध्वनति। मनोहारिणी चेयं धरणी। यैर्यैरेव जीवनं मे मधुरीकृतम्, तत्समुच्चय-मेवाद्य नमस्करोमि।

[प्रविशति वटुः]

वटुः—वारितोऽहं गमनात्। किञ्च, प्रहृतोऽहं विताडितः।

अभिजित्—किमिदं भोः ? कथं ते ललाटं विदीर्य निःसरति रक्तधारा ?

वटुः—सर्वेषां सतर्कीकरणार्थमेव मया वहिर्गतम्। उक्तञ्च मया—तेन मार्गेण मा गच्छ। प्रतिगम्यतामिति।

अभिजित्—कथम्, किं संजातम् ?

वटुः—न जानासि, युवराज ? यत्ते तु इदानीं यन्त्रवेदिकोपरि तृष्णाराक्षसीं स्थापयिष्यन्ति ; कामयन्ते नर-वलिम्।

सञ्जयः—किं न्वेदम् ?

वटुः—तद्वेदिकाग्रन्थनकाले पौत्रद्वयस्य मे रक्तधारां ते ववर्षुः। स्वत एव भङ्क्ष्यति पापपीठिकेयमिति मनसि जातम्। किन्तु, नाद्यापि सा भग्नीभूता, नापि जागरितश्च भैरवः।

अभिजित्—भङ्क्ष्यत्येव। समागतः कालः।

वटुः—(अन्तिकमुपागम्य अनुच्चस्वरेण)—तर्हि श्रुतम्? श्रुतं भैरवस्याह्वानम्?

अभिजित्—श्रुतमेव।

वटुः—हा कष्टम्! तर्हि नास्ति ते निस्तारः?

अभिजित्—न हि। नास्त्येव।

वटुः—किं न पश्यसि—शिरसो मे स्रवति शोणितधारा, सर्वाङ्गेषु च धूलिजालः। यदा नु वक्षो विदीर्णं भविष्यति तदा किञ्चैतत्, कुमार, सोढुं शक्ष्यसि?

अभिजित्—सहिष्ये खलु भैरवस्य प्रसादेन।

वटुः—चतुर्दिक्षु यदा सर्वे वैरमाचरिष्यन्ति? स्वजनाश्च यदा धिक्कारमुदीरयिष्यन्ति?

अभिजित्—नूनमेव सोढव्यम्।

वटुः—तर्हि, नास्ति भयम्?

अभिजित्—अथ किम्! नास्ति भयम्।

वटुः—साधु साधु। तन् मा विस्मर वटुम्। मयापि अवलम्ब्यते स पन्थाः। भैरवेणाङ्कितं मे ललाटतटे यद् रक्ततिलकं, तेनैव अन्धकारेऽपि मामवगमिष्यसि।

[वटुः प्रस्थानं करोति। राजप्रहरी उद्धवः प्रविशति]

उद्धवः—नन्दि-संकटस्य द्वारं कथमुन्मोचितम्, युवराज?

अभिजित्—शिवतलवासिनां जनानां नित्यदुर्भिक्षाद् रक्षणाय।

उद्धवः—महाराजस्तु तेषां साहाय्यविधानार्थं समुद्यतः। तस्मिन्नप्यस्ति दया ममत्वं च।

अभिजित्—दक्षिणकरस्य कार्पण्येन पन्थानं निरुध्य वामकरस्य वदान्यतया कस्यापि रक्षा न हि सम्भवति। तेनैव चोन्मोचितो मया तेषामन्नचलाचलस्य पन्थाः। दयोपरि निर्भरस्य दैन्यं न मे रोचते।

उद्धवः—महाराजः कथयति—नन्दिसंकटस्य प्रतिरोधं विनाश्य त्वया उत्तरकूटस्य भोजनपात्रतलमपसारितम्।

अभिजित्—शिवतलाधिवासिनामन्नजीवित्वरूपाच्चिरन्तनदुर्भाग्याद्दुत्तर-कूटीयानां मुक्तिर्मया प्रदत्ता।

उद्धवः—कृतमेतद् दुःसाहसिकम्। महाराजस्तु विदितवृत्तान्तः। नातःपरं वक्तुं शक्नोमि। अर्हसि चेदधुनैव प्रस्थानं कुरु। अध्वनि दण्डायमानस्य मे त्वया सह आलपनमपि न हि निरापदम्।

[उद्धवः प्रस्थानं करोति]

(प्रविशति अम्बा)

अम्बा—सुमन, वत्स सुमन! भोः भोः! येन पथा स नीतस्तेनैव पथा किं युष्माभिर्न गतम्?

अभिजित्—किं वलान्नीतस्ते पुत्रः?

अम्बा—अथ किम्? अमुत्र पश्चिमदिगन्ते यत्र हि तपनोऽस्ताचलमेति, यत्रैव च भवति दिनस्यावसानम्।

अभिजित्—अनेनैव पथा मयापि गन्तव्यम्।

अम्बा—तर्हि पालय भाग्याहतायाः अभ्यर्थनामेकाम्—यदा तं द्रक्ष्यसि, कथय जननी ते पन्थानं निरीक्ष्यमाणा प्रतीक्षत इति।

अभिजित्—वक्ष्यामि।

अम्बा—वत्स, त्वं चिरजीवी भव। सुमन—मम सुमन।

(प्रस्थानं कुरुते)

[भैरवपन्थिनः प्रविश्य गायन्ति]

जय भैरव! जय शंकर!
जय जय जय प्रलयंकर!
जय संशयभेदन, जय बन्धनच्छेदन
जय संकटसंहर, शंकर शंकर!

(प्रस्थानम्)

[सेनापतिर्विजयपालः प्रविशति]

विजयपालः—युवराज, राजकुमार, गृह्यतां मे विनीतमभिवादनम्। महाराजसकाशादागतोऽस्मि।

अभिजित्—को हि तत्रभवत आदेशः?

विजयपालः—रहसि कथयिष्यामि ।

सञ्जयः—(अभिजितः करं दृढं धृत्वा)—कथं रहसि ? किं मत्तोऽपि गोपनीयम् ?

विजयपालः—तदेव आदेशः । राजशिविरे वारमेकं पदार्पणं क्रियतां राजकुमारः ।

सञ्जयः—अहमपि सहैव गमिष्यामि ।

विजयपालः—तत्तु नाभिमतं महाराजस्य ।

सञ्जयः—तर्हि अस्मिन्नेव पथि अहं प्रतीक्षिष्ये ।

[सहाभिजिद् विजयपालः शिविरं प्रति चलति]

[प्रविशति कश्चिदुदासी]

गानम्

नासौ प्रत्यागमिष्यति, न भवेत्तदागमनम् ।
झटिकामभि मोचिता तरणी, न पुनरेष्यति कूलम् ।
मत्तेन केनासौ चाहूय नीतः
अनुसंत्यक्तः केवलं रुदितः
न हि तमाश्लेक्ष्यति तव बाहुबन्धनम् ।।

(प्रस्थानम्)

[प्रविशति काचित् पुष्पविक्रयकारिणी]

पुष्पविक्रेत्री—भद्र, को हि उत्तरकूटनिवासी विभूति-नामधेयो जनः ?

सञ्जयः—कथम् ? तेन किं ते प्रयोजनम् ?

पुष्पविक्रेत्री—वैदेशिकाऽहम्, देवतलिग्रामादागच्छामि । उत्तरकूटवासिनः सर्वे तस्यागमननिर्गमणमार्गेषु कुसुमानि वर्षन्तीति मया श्रुतम् । अपि साधुमहात्माऽसौ जनः ? तत्र भवतो दर्शनलाभार्थमेव प्रचितानि मया स्वकीयमालञ्चस्य कुसुमानि ।

सञ्जयः—मास्तु वा साधुमहात्मा । बुद्धिमान् खल्वसौ ।

पुष्पविक्रेत्री—किं तेन सम्पादितम् ।

सञ्जयः—अस्माकं निर्झरिणी तेन निरुद्धा ।

पुष्पविक्रेत्री—तेनैव पूजनसमारोहः ? निर्झरबन्धनेन किं सिद्ध्यति दैवकृत्यम् ?

सञ्जयः—न हि न हि। पतिष्यति निगडबन्धनं दैवतकरेषु।

पुष्पविक्रेत्री—तेनैव पुष्पवर्षणाम् ? न हि बुद्ध्यते मया।

सञ्जयः—श्रेयान् हि अनवबोधः। अनुचितः खल्वपात्रे दैवतकुसुमानामपचयः। प्रतिगम्यताम तावत्।—यातु, शृणु शृणु, किं विक्रेष्यसि मह्यं तवैतत् श्वेतपद्मम् ?

पुष्पविक्रेत्री—साधुजनाय यत् प्रकल्पितम्, न हि तत्कुसुमं विक्रेतुमलम्।

सञ्जयः—यो हि महाजनो मे सर्वाधिकभक्तिभाजनं, तस्मै एव निवेदयिष्यामि।

पुष्पविक्रेत्री—तर्हि गृह्यतामेतत्। न हि मूल्यं ग्रहीष्यामि। निवेद्यतां तत्रभवते मे प्रणामाञ्जलिः। विज्ञाप्यतां चैतदहं देवतलवासिनी दुःखिनी पुष्पविक्रयकारिणीति।

(प्रस्थानम्)

[प्रविशति विजयपालः]

सञ्जयः—कुत्र मे अग्रजः ?

विजयपालः—शिविरे कारारुद्धस्तिष्ठति।

सञ्जयः—युवराजः कारारुद्धः ? अहो, अमार्जनीयेयं स्पर्द्धा।

विजयपालः—दृश्यतामेतन्महाराजस्यानुशासनम्।

सञ्जयः—कस्यायं कपटप्रबन्धः ? तत्सकाशमुपगन्तुं सकृदनुमतिर्मे प्रदीयताम्।

विजयपालः—मर्षय माम्।

सञ्जयः—विद्रोही खल्वहम्। मामपि कारायां निक्षिप।

विजयपालः—नास्त्यादेशः।

सञ्जयः—भवतु, अधुनैव आदेशग्रहणार्थं गच्छामि।

(कतिचित् पदानि गत्वा प्रतिनिवृत्य)

विजयपाल, मम नामोल्लेखपूर्वकमेतत् पद्मं प्रदीयतां मे अग्रजाय।

(उभयोः प्रस्थानम्)

[शिवतलनिवासी उदासी धनञ्जयः प्रविशति]

गानम्

मरणसिंधुं तरिष्यामि विषम-झटिका-समुत्तालम्
मम भीति-भञ्जन-तरी-सहयोगम् ।
समाश्रित्य चाभयवाणीं छिन्न-नौपट-सवीर्यम् ॥
उपस्थास्यते तव तत् कूलं मम जलयानं
प्राप्स्यते छायावट-तरुच्छायम् ।
कामयते यो मां स हि दर्शयिष्यति पन्थानम् ।
चालयिष्यामि तरीमभयमनसा, तद्धि मे दायम् ॥
जाने जाने चैतत् दिनान्ते चोपगम्य कूलम् ।
निवेदयिष्यामि तव करुणाशीतलपदतले
मम दुःखदिवस-रक्तकमलम् ॥

[शिवतलवासि-प्रजासङ्घः प्रविशति]

धनञ्जयः—मलिनं मुखमण्डलम् ! कथं भोः, किं संघटितम् ।

प्रथमः—प्रभो असहनीयः खलु राजश्यालकचण्डपालस्य प्रहारः । नासौ मानयति अस्माकं युवराजमपि । तेनैतदधिकतरमसहनीयं भवति ।

धनञ्जयः—अरे, युष्माभिरद्यापि किं न विजितः प्रहारः । कष्टमनुभूयते अद्यापि ।

द्वितीयः—राज्ञः प्रतिहारभूमौ नीत्वा प्रहरति ! भृशं खल्वपमानम् ।

धनञ्जयः—अरे, युष्माकं मानं स्वसमीपं प्रतिरक्षन्ताम् । निवेद्यताश्चैतत् हृदयस्थितदैवतस्य पदमूले । अपमानं तत्र न कदापि प्रवेक्ष्यति ।

[सङ्घपतिर्गणेशः प्रविशति]

गणेशः—न पुनः सोढुं शक्नोमि । किमपि करणार्थमुदग्रं मे करयुगलम् ।

धनञ्जयः—तर्हि विकलीभूतो ते कराविति मन्यते ।

गणेशः—आदिशतु देव, अस्य षण्डामर्कतुल्यस्य चण्डपालस्य दण्डमपसार्य प्रहारस्य स्वरूपं तावत् प्रदर्शयामि ।

धनञ्जयः—यच्च प्रहारसंज्ञं न भवति, किं तत्प्रदर्शयितुं न शक्नोसि । शक्तेराधिक्येन प्रयोजनमिति मन्ये ! न हि विरमन्ति अभिहतास्तरङ्गाः । स्थिरीकृते तरण्याः कर्णदण्डे शक्ष्यसि खलु विजेतुम् ऊर्मिभङ्गान् ।

चतुर्थः—इदानीं किमुपदिश्यते भवता ।

धनञ्जयः—कृन्त्यतां तावन्मूलत एव मारम्।

तृतीयः—देव, कथमेतत् सम्भवति।

धनञ्जयः—समुन्नतमौलिर्यदा वक्तु शक्ष्यसि—नहि पीडयति प्रहार इति, तदैव छिन्नतां गमिष्यन्ति मारस्य मूलानि।

द्वितीयः—न पीडयतीति कथनं ननु कठिनमेव।

धनञ्जयः—यो हि यथार्थपुरुषः, नैवासौ पीड्यते। स हि आलोकशिखेव। प्रहारस्तु पीडयति पशुम्। यतः स हि मांस-समुच्चयः, अतः प्रहृतः क्लिष्टः सन् आर्तनादं कृत्वा म्रियते। कथं विमूढोसि ? किं न बुध्यते मर्मार्थः ?

द्वितीयः—त्वामेव अवगच्छामो वयम्, त्वद्वचनार्थस्याधिगमेनालम्।

धनञ्जयः—तर्हि सर्वनाशः सञ्जातः।

गणेशः—समयमपेक्षते वचनार्थस्य भाववोधः। स हि न सहते विलम्बनम्। अवगतोऽसि त्वम्; तेनैव सपदि तरिष्यामः।

धनञ्जयः—अनन्तरं यदैव भविष्यति दिनावसानम् ? तदा हि द्रक्ष्यसि यत् उपकूलम् उपगम्यैव तरणी निमग्नेति। यद्धि सत्यम्, अन्तस्तलाद् दृढीकृत्य यदि तन् न गृह्णासि तदा मङ्क्ष्यसि।

गणेशः—मैवं देव! तव चरणाश्रितोऽहं सर्वम् कथमिव अवगच्छामि।

धनञ्जयः—न हि बोधितोऽसि, तन्मयावगम्यते। युष्माकं दृष्टिस्तु अरुणायते, कण्ठमध्यात् न हि निःसरति स्वरः। अपि स्वरसंयोगं कारयिष्यामि ?

(गानम्)

प्रहर प्रहर नाथ निर्दयतरम्,
एवमेव माम् अधिकतरम्।

रे भीरो, युष्माभिस्तु प्रहारपरिहारार्थमेव प्रहाराय पलायनाय वा चेष्टते। द्वयमेव तुल्यम्। एतद्द्वयमेव पशुपक्षं नयति, न खलु लभ्यते पशुपतेर्दर्शनम्।

(गानम्)

अन्तरालगतो पलायिष्ये रहसि
शंकाकुलः केवलं परिहरामि त्वाम्।
अपनयापनय यदस्ति मम सर्वस्वम्
कुरु कुरु निष्किञ्चनं माम्॥

शृणु तात, अहं विचारणार्थं मृत्युञ्जयमुपगच्छामि। वक्तुमिच्छामि यत् आघातः किं मां पीडयतीति स्वयमेव त्वं परीक्षस्वेति। यो हि भयवशंगच्छति, प्रदर्शयति वा भीतिं, तस्य भारं स्कन्धेन समुह्य अग्रेगन्तुं नाहमिच्छामि।

(गानम्)

साधय साधय तदद्य यदस्ति तव कृत्यम्
भवतु मे पराभवो, व्रजसि त्वमुत पराजयम्।
हट्टघट्टपथिषु क्रीडतो
हास्य-केलि-कौतुकैरपगता मम वेला।
द्रक्ष्यामि तत् केन क्रन्दयसि माम्॥

सर्वे—साधु साधु देव। तथास्तु। द्रक्ष्यामस्तत् केन क्रन्दयसि नः।

प्रथमः—किन्तु, कथ्यताम्—कुत्र त्वया गम्यते इति।

धनञ्जयः—राज्ञ उत्सवमुपलक्ष्य।

तृतीयः—देव, राज्ञो य उत्सवस्त्वयि स कां परिणतिं यास्यतीति किं वक्तुं शक्यते? कथं तत्र यास्यसि?

धनञ्जयः—राजसभायां कीर्तिं स्थापयिष्यामि।

चतुर्थः—त्वयि राज्ञः करायत्ते—नहि, नहि, तन्नैव भवेत्।

धनञ्जयः—अरे, कथं न भवेत्? नितरां सम्भवेत्, उदरपूरं भवेत्।

प्रथमः—राज्ञो नास्ति ते भयम्, अस्माकन्तु भवति शंका।

धनञ्जयः—युष्माकं मनसि चास्ते मरणवासना, तेनैव बिभीत। नाहं घातयितुमिच्छामः, तस्मान्नास्ति मे भीतिः। यो हि हिंसापरायणस्तमेव भयं दशन् लग्नं तिष्ठति।

द्वितीयः—यातु, वयमपि त्वया सार्द्धं गमिष्यामः।

तृतीयः—राजसकाशे ज्ञापयिष्याम आवेदनम्।

धनञ्जयः—तत्र च किं प्रार्थयितव्यम्?

तृतीयः—प्रार्थनीयं तु पुष्कलम्। पूर्यते चेत् तदैव—सिद्धिः।

धनञ्जयः—किं राजत्वं न कामयिष्यसे?

तृतीयः—किमुपहससि, देव?

धनञ्जयः—कथम् उपहसिष्यामि ? एकपदेन चलनात् किमस्ति अधिकं दुःखम् ? राजत्वं यदि भवति केवलं राज्ञ एव, न खलु प्रजानां, तदा खञ्जीभूतस्य तद्राजत्वस्य उल्लम्फनं दृष्ट्वा यूयं विस्मयं गन्तुमर्हथ ; परन्तु देवानां नयनात् प्रवहति अश्रुधारा। अरे, राज्ञः कल्याणार्थमेव राजत्वस्य अधिकारो युष्माभिः प्रार्थनीयः।

द्वितीयः—यदा स विताडयिष्यति ?

धनञ्जयः—राजसभायाः शीर्षचारी यदा अभियोगं समर्थयते, तदा राज्ञो विताडनं राजानमेव विताडयति।

(गानम्)

विस्मरामि प्रायशोऽहम्

वाञ्छसि त्वं दातुं स्थानम्।

जोहूयसे नाम्ना प्रसार्य तव चासनम्।

वत्स, सत्यं नु ब्रवीमि ? यावदेव तस्यैवासनमिति न परिज्ञास्यसि, तावदेव सिंहासने न प्रतिष्ठितो भविष्यत्यधिकारः, न कदापि राज्ञः, उत वा प्रजानाम्। स्फीतेन वक्षसा तत्र नोपवेशनीयम्, युक्तकरेणैव उपवेष्टव्यम्।

(गानम्)

नास्मानवगच्छति प्रतिहारी

अवरुणद्धि मध्ये ते पन्थानम्,

नय मामभ्यन्तरं

जोहूय वहिः प्रतीक्षमानम्।

प्रतिहारी किं वृथैव न परिजानाति ? ललाटस्य राजतिलकं रजोराशिभिर्विलीयमानमिव दृश्यते। अन्तरं तु न वशीभूतम्, राजत्वं कर्तुं वहिरेव धावसि ? आदौ राजा भूत्वा तदनन्तरं राजासने उपविशति ; राजासनमध्यास्यैव कश्चिन्न हि भवति राजा।

(गानम्)

कृतस्त्वया स्वकरेण प्राणदानम्।

अर्पितश्च मानं तत्सनाथम्॥

न तिष्ठति लोभ-भीति-लज्जाभिस्तन्मानम्।

एति च रजसामावरणं प्रतिदिनं परिम्लानम्॥

प्रथमः—यथा तथा वा ब्रवीहि, कथं राजद्वारं प्रचलसीति नाऽहमवगच्छामि।

धनञ्जयः—कथं तत् कथयिष्यामि ? भृशं खलु विभ्रान्तं मे मनः।

प्रथमः—किं तत् ?

धनञ्जयः—यूयं यतोऽधिकं माम् आलिंगथ, ततोऽधिकमेव पश्चाद् गच्छति युष्माकं सन्तरणशिक्षा। ममापि पारंगमने आयाता खलु बाधा। अतः, अवकाशग्रहणार्थं तत्रैवाहं गच्छामि, यत्र न मानयति मां कोऽपि।

प्रथमः—राजा तु त्वामवलीलया न मोचयिष्यति।

धनञ्जयः—अरे, कथं मोचयिष्यति ? यदि मां रोद्धुं शक्नोति, तदा किं तिष्ठति कापि चिन्ता ?

मम निगडबन्धनं यस्य साधनं भविष्यति
किं तद् भवेदनिमित्तम् ?
समापन्नो मम बन्धनम् भविता स हि मम बन्धनम्
किं तद् भवेदनिमित्तम् ?
को मामिच्छति वशीकर्त्तुं साहसात्
किं तद् भवेदनिमित्तम् ?
वशीकृत्य चात्मानं निमज्जतु प्रेमरसे चासौ
किं तद् भवेदनिमित्तम् ?
दैवेन लिखितमस्ति तस्य रोदनम्,
यो हि मम रोदयिता,
किं नु तद् भवेदनिमित्तम् ?

द्वितीयः—किन्तु, देव, तव देहमभि हस्तमुत्तोलयिष्यति चेत्, तदा नाहं सोढुं शक्ष्यामि।

धनञ्जयः—यस्य चरणतले विक्रीतोऽयं देहः, यदि तेन सह्यते, तदा युष्माभिरपि सोढव्यम्।

प्रथमः—भवतु, देव, आगम्यतां तावत्, श्रोष्यामः, श्रावयिष्यामश्च ; अनन्तरं दैवेन यत् लिखितं तदेव भवतु।

धनञ्जयः—तदा त्वत्रैव यूयम् उपविशत। अत्र न कदाप्यहमागतः। मार्गादीनां वार्तां तावत् परिज्ञाय आगच्छामि।

(प्रस्थानम्)

प्रथमः—भ्रातः, किम् अवलोकितम्? उत्तरकूटस्य मानुषाणां कीदृशी आकृतिरिति? विधाता मांसपिण्डेनैव निर्मातुमारब्धवान्, न पुनः समापयितुमवकाशं प्राप्त इति मन्ये।

द्वितीयः—अपरञ्च, किं दृष्टा तेषां कच्छद्वयविरचिता वसनपरिधानरीतिः?

तृतीयः—मन्येऽहम्, आत्मानं बृहत्पोटलिकया संबद्धं कृतवान्, यदि इयत्परिमाणापि हानिर्भवति।

प्रथमः—श्रमदानार्थमेव केवलं ते जन्म स्वीचक्रुः; केवलं सप्तघट्टस्य जलमतिक्रम्य सप्तहट्टेषु परिभ्रमन्ति।

द्वितीयः—तेषां तु नास्ति कापि शिक्षा। यानि खलु तेषां शास्त्राणि, तत्रापि च किम् अस्ति?

प्रथमः—नास्ति किमपि, नास्ति किमपि। किं न दृष्टं, वल्मीकमिव तेषां लिपिसमुच्चयः?

द्वितीयः—वल्मीकास्त्वेव। तेषां विद्या यदेव स्पृशति, तदेव निकृत्य खण्डशः करोति।

तृतीयः—ततो निर्माति मृत्तिकास्तूपम्।

द्वितीयः—तेषामस्त्रेण निहन्यते प्राणाः, शास्त्रेण निहन्यते मनः।

प्रथमः—पापम्, पापम्। अस्माकं गुरुदेवेनोच्यते—पद्भ्यां तेषां छायास्पर्शनमपि नैव नैव च करणीयम्। जानासि कथमिति?

तृतीयः—कथं तद्, उच्यताम्।

द्वितीयः—किं तन्न जानासि! अवसिते समुद्रमन्थने देवानां भाण्डात् यत्रैव मृत्तिकायां निपतिता अमृतधारा, तयैव मृत्तिकया निर्मिताः शिवतलाधिवासिनोऽस्माकं पूर्वपुरुषाः। अपरञ्च, दैत्यास्तु यदा देवतानामुच्छिष्टं भाण्डं पुनः पुनः संलिह्य पयःप्रणाल्यां निचिक्षिपुस्तदा भग्नभाण्डजातया दग्धमृत्तिकया विनिर्मिताश्चोत्तरकूटस्य जनाः। एतदर्थमेव ते तु कठिनाः; किन्तु, धिगस्तु तान् अपवित्रान्।

तृतीयः—कुतः सम्प्राप्तेयं वार्ता?

द्वितीयः—गुरुदेवः स्वयमेव एवमुक्तवान्।

तृतीयः—(गुरुमुद्दिश्य प्रणम्य) गुरो, त्वमेव सत्यम्।

[उत्तरकूटस्य केषाञ्चिन्नागरिकाणां प्रवेशः]

प्रथमः—अपरं सर्वमेव सुष्ठु जातम्, किन्तु कर्मकारतनयो विभूतिः क्षत्रियवर्णो राज्ञा प्रसभं प्रतिष्ठितः—एतत्तु—

द्वितीयः—एषा त्वस्माकं गार्हस्थ्यवार्ता ; अस्माकं ग्रामं प्रतिगम्य अस्मिन् विषये सिद्धान्तं स्थिरीकरिष्यामः। अधुना उच्यतां—विजयतां यन्त्रराजो विभूतिरिति।

तृतीयः—क्षत्रियस्य अस्त्रेण सार्द्धं वैश्यस्य यन्त्रं येन खलु संयोजितं, जयतु स यन्त्रराजो विभूतिः।

प्रथमः—भ्रातः, तत्र दृश्यन्ते चामी शिवतलाधिवासिनो लोकाः।

द्वितीयः—कथं त्वया अवगतम्?

प्रथमः—कर्णावरणकारि-शिरोवेष्टनं किं न पश्यसि? कीदृशमद्भुतमिव दृश्यते। ऊर्द्ध्वदेशाच्चपेटाघातेन तेषां वृद्धिस्तु केनापि निरुद्धीकृता।

द्वितीयः—भवतु, वर्त्तन्ते बह्वो देशाः मनुष्याश्च। किन्तु, कथं त एव केवलं कर्णावरणकारिशिरोवेष्टनं परिदधते? श्रुतियुगस्य विरचनन्तु विधातुर्मतिभ्रम एव इत्येवं किं तैर्मन्यते?

प्रथमः—बुद्धिस्तु बहिर्गच्छेदित्याशङ्कया कर्णोपरि बन्धनं विरचितमिति मन्ये।

(सर्वेषां हास्यम्)

तृतीयः—अहो, तदेव सत्यम्? उत बुद्धिर्विभ्रान्ता सती यद्यभ्यन्तरं प्रविशति—एतदेव कारणम्? (हास्यम्)

प्रथमः—यद्युत्तरकूटस्थः कर्णपीडनस्यापदेवस्तेषां कर्णौ प्राप्स्यति। (हास्यम्) अरे शिवतलाधिवासिनो मूढाः, नास्ति स्पन्दनम्, नास्ति वचनध्वनिः तत् किं सञ्जातम्?

तृतीयः—किं युष्माभिर्न ज्ञायते यदद्यास्माकमानन्ददिवसः? उच्यतां, विजयतां यन्त्रराजो विभूतिरिति।

प्रथमः—कथं मौनी तिष्ठसि? किं कण्ठो निरुद्धः? तत् किं कण्ठपीडनमन्तरेण शब्दो न निर्गमिष्यति? उच्यतां यन्त्रराजो विभूतिरिति।

गणेशः—कथं विभूतेर्जयघोषणम्? किमनुष्ठितं तेन?

प्रथमः—किमुच्यते त्वया? किं कृतमिति? एतादृशः शुभसन्देशो नाधुनापि श्रुतिपथं गतः? ननु, कर्णावरणकारिशिरोवेष्टनस्य माहात्म्यं किं दृष्टम्?

तृतीयः—युष्माकं तृष्णायाः जलन्तु तस्यैव आयत्तीभूतम्। यदि स कारुण्यं प्रदर्शयति, तदा तु वर्षणाभावे भेका इव विशुष्काः सन्तः यूयं सर्वे पञ्चत्वं गमिष्यथ।

शि-द्वितीयः—तृष्णायाः जलं किं विभूतेरधिकारभूतम्। अकाण्डे किं स दैवतः सञ्जातः?

द्वितीयः—देवतायै अवकाशं प्रदाय दैवतकार्यं स स्वयमेव साधयिष्यति।

शि-प्रथमः—दैवतकार्यम्! निदर्शनमेकं तावत् प्रदर्शय।

प्रथमः—तद्धि निदर्शनं मुक्तधाराया बन्धनम्।

(शिवतलस्य सर्वेषामुच्चहास्यम्)

प्रथमः—युष्माभिर्मन्यते—किमयं परिहास इति?

गणेशः—नायं परिहासः? मुक्तधारां निरुद्धां करिष्यति? भैरवेन स्वहस्तेन यत् प्रदत्तं, युष्मदीयः कर्मकारपुत्रस्तत् बलादपनेष्यति?

प्रथमः—दृश्यताम्—अमुष्मिन् नभसि—

शि-प्रथमः—अहो, किं तत्?

शि-द्वितीयः—सुविशालः लौहपतङ्गो गगनं प्रति उज्जृम्भते इव।

प्रथमः—तस्य पतङ्गस्य पद्भ्यां युष्माकं जलं निरुद्धीकृतम्।

गणेशः—आस्तां तावदसारवचनम्। कदा तु कथयिष्यसि अमुष्य पतङ्गस्य पक्षोपर्युपविश्य युष्माकं कर्मकारतनयस्तु चन्द्रं ग्रहीतुं निर्गच्छतीति।

प्रथमः—दृश्यतां तावत् कर्णावरणस्य महत् फलम्। श्रोतव्यमपि ते न श्रोष्यन्ति; तदर्थमेव ते म्रियन्ते।

शि-प्रथमः—मृता अपि वयं न मरिष्याम इत्यस्माकं समयः।

तृतीयः—सुष्ठु कृतम, को हि तज्जीवयिष्यति?

गणेशः—दैवतमस्माकं किं न दृष्टम्? प्रत्यक्षो देवः। धनञ्जयदेवोऽस्माकम्? तस्य एको देहो मन्दिराभ्यन्तरे, अपरश्च वहिस्तिष्ठति।

तृतीयः—कर्णावरणकारिणः किं ब्रुवन्ति? तेषां मरणं न कोऽपि निरोद्धुं शक्ष्यति।

[उत्तरकूटाधिवासिनां प्रस्थानम्। धनञ्जयस्य प्रवेशः]

धनञ्जयः—रे मूढ, किमुच्यते? युस्माकमुज्जीवनकृत्यं मदायत्तम्? तदा तु यूयं सप्तकृत्वो मरणमालिङ्ग्य प्रेताः सञ्जाताः।

गणेशः—उत्तरकूटाधिवासिनोऽस्मान् भीषयन्ते यद् विभूतिना मुक्तधारायाः बन्धनं विरचितमिति ।

धनञ्जयः—किमुक्तं—बन्धनं निर्मितमिति ?

गणेशः—देव, वाढम् ।

धनञ्जयः—किं सर्वमेव न श्रुतम् ?

गणेशः—किं तच्छ्रोतव्यम् ? हास्येन तदुत्क्षिप्तम् ।

धनञ्जयः—किं युष्माकं निखिलाः कर्णाः केवलं मत्सकाशे एव न्यासीकृताः ? युष्माकं सर्वेषां यत् श्रोतव्यं, तत् किं मयैव श्रवणीयम् ?

शि-तृतीयः—देव, तत्र श्रवणीयं किं वर्तते ?

धनञ्जयः—किमुच्यते त्वया ? या खलु शक्तिर्दुरन्ता, तस्याः निरोधो न खल्वनायाससाध्यः । भवतु नु तदन्तर्देशे बाह्यतो वा ।

गणेशः—देव, तदर्थमेवास्माकं तृष्णायाः जलं निरोत्स्यति ?

धनञ्जयः—तत्तु वार्तान्तरम् । भैरवस्तन्न सहिष्यते । तदपेक्ष्यतां तावत् । अहन्तु अनुसन्धाय आगच्छामि । अरे, विश्वमिदं वाणीमयम् । यतः श्रवणं निरुद्धं करिष्यसि, मृत्युवाणश्चागमिष्यति तस्मादेव दिङ्मण्डलात् ।

(धनञ्जयस्य प्रस्थानम्)

[शिवतलस्य कस्यचिन्नागरिकस्य प्रवेशः]

शि-तृतीय—अरे, विषण्णः समागतः ! कः सन्देशः ?

विषण्णः—युवराजः शिवतलात् राज्ञा समाहूय आनीतः । अतःपरं तत्र तस्यावस्थाने नास्त्यनुमतिः ।

सर्वे—तन्न भविष्यति, कथमपि तन्न भविष्यति ।

विषण्णः—तदा किं करिष्यथ ?

सर्वे—प्रत्यानेष्यामः ।

विषण्णः—केनोपायेन ।

सर्वे—बलात्कारेण ।

विषण्णः—किं राज्ञा सह शक्ष्यथ ?

सर्वे—न वयं राजानं स्वीकुर्मः ।

(रणजितो मन्त्रिणश्च प्रवेशः)

रणजित्—कं न स्वीकुरुथ ।

सर्वे—प्रणमामः ।

गणेशः—विचारार्थं भवत्सकाशमागताः वयम ।

रणजित्—कं विषयमधिकृत्य विचारः ?

सर्वे—वयं युवराजं प्रार्थयामः ।

रणजित्—किमुच्यते !

प्रथमः—वयं युवराजं शिवतलं नेष्यामः ।

रणजित्—ततो मनस आनन्देन राजस्वप्रदानं विस्मरिष्यसि ।

सर्वे—अन्नाभावात् वयं सर्वे मृतकल्पाः सञ्जाताः ।

रणजित्—कुत्र युष्माकं दलपतिः ।

द्वितीयः—(गणेशं प्रदर्श्य) अत्रैवास्माकं दलपतिर्गणेशः ।

रणजित्—नासौ । युष्माकं सन्न्यासी ।

गणेशः—अदूरे तत्रभवान् आगच्छति ।

(धनञ्जयस्य प्रवेशः)

रणजित्—किमिमे प्रजाजनास्त्वया समुत्तेजिताः ?

धनञ्जयः—बाढम्, तान् उत्तेजयामि, स्वयमेवापि उत्तेजितो भवामि ।

(गानम्)

आकुलीकृत्य दिशि दिशि मां विहरति यो
न जाने तमुन्मादम् ।
अभिव्याप्य गगनमहो वादयति समीरे
किमसौ मोहनवेणुं मधुरम् ।
अस्तं याति याति वेला
भवति कीदृशी खलु प्रमत्तस्य खेला—
आकुलीकरोति चाहूय मामसौ न चायाति वशम्
अनुसन्दधामि तं गिरिकानने, विलपामि हताशम् ।।

रणजित्—उन्मत्त इव आचर्य नार्हसि त्वं प्रासङ्गिकीं वार्तामन्तरितुम् । उच्यतां—किं राजस्वं दास्यसि न वा ?

धनञ्जयः—महाराज, न हि, न दास्यामः ।

रणजित्—न दास्यसि, ईदृशी ते स्पर्धा !

धनञ्जयः—यत् खलु न युष्मदीयं, नार्हामस्तत् तुभ्यं प्रदातुम् ।

रणजित्—किं, न खलु मदीयम् ?

धनञ्जयः—मम उद्धृत्ते अन्ने एव तवाधिकारः, न तु क्षुधायाः अन्ने।

रणजित्—किं त्वयैव प्रजाजनाः राजस्वप्रदानाद् वारिताः ?

धनञ्जयः—ते तु भयाद्दातुमिच्छन्ति, अहं निवार्य ब्रवीमि—येन खलु प्राणाः प्रदत्तास्तस्मै एव प्राणाः प्रदातव्याः।

रणजित्—आश्चर्यं ते प्रसार्य तेषां भयं प्रावृणोषीति ह्यम्। बहिराश्रयावरणस्य कुत्रापि यदि छिद्रं भवति, तदा आभ्यन्तरीणां भयं सप्तकृत्वो बलान्निर्गमिष्यति। तदा तु षञ्चत्वं गमिष्यन्ति। पश्य सन्न्यासिन्, ललाटे तव दुःखं लिखितमास्ते।

धनञ्जयः—यद्दुःखं ललाटे लिखितमासीत्, वक्षस्येव तद्दुःखं समानीतम्। दुःखस्य विधाता तत्रैव निवसति।

रणजित्—(प्रजागणं प्रति) अहं युष्मान् ब्रवीमि—यूयं सर्वे शिवतलं प्रतिगच्छथ। सन्न्यासिन्, त्वया अत्रैव अवस्थातव्यम्।

सर्वे—स्थितेष्वस्माकं प्राणेषु न हि तद्भविष्यति।

(गानम्)

धनञ्जयः— तिष्ठतीति स्थापयसि कं
कदा भवेत्ते वचः सफलम्।
न हि सिध्यति चेष्टनं भ्रातः
स्थास्यति यदेव ध्रुवम्॥

राजन्, आकृष्य किमपि रक्षितुं नार्हसि। अनायासेन रक्षणे शक्तिर्विद्यते चेत् तदेव रक्षणं सम्भविष्यति।

रणजित्—को हि निर्गलितार्थः ?

धनञ्जयः—यः सर्वं ददाति, स सर्वमेव रक्षति। लोभात् यद्रक्षितुमिच्छसि, तद्धि भविष्यति चौर्यलभ्यपदार्थः, तत्तु न स्थास्यति।

(गानम्)

यथेच्छं कर्तुमर्हसि,
बलाद्रक्ष मारय वा ;
तेन व्यथते यस्य गात्रम्,
सहते स हि यत् तत् सहनीयम्।

राजन्, बलादपह्रियते यदि विश्वं, तद्धि तवैव भविष्यतीति त्वया यत् चिन्त्यते, तदयं तवैव प्रमादः। मोचनेनैव यत् प्राप्यते मुष्टिमध्ये, पेषणेन तदपस्रियते इत्येतत् अवगन्तव्यम्।

(गानम्)

मन्यसे तद् भाव्यं वाञ्छसि यद् त्वम्,
नर्तयसि चेति निखिलं विश्वम्,
वेत्सि सहसा मुक्तनयनो
भवत्येव तदपि यन् न भाव्यम्॥

रणजित्—मन्त्रिन्, सन्न्यासिनमत्रैव निरुद्धं कुरु।

मन्त्री—महाराज,—

रणजित्—आदेशोऽयं किं तव नानुमतो भवति ?

मन्त्री—शासनस्य भीषणं यन्त्रं तु निर्मितम् ? अनन्तरं पुनरपि भयं यदि प्रवर्द्धते तदा सर्वाण्येव भग्नीभविष्यति।

प्रजाः—नैतद्भविष्यत्यस्माभिः सहनीयम्।

धनञ्जयः—प्रतिगच्छथ यूयम्; अहं ब्रवीमि—प्रतिगच्छथ।

प्रथमः—देव, किं त्वया न ज्ञातम् यत्—युवराजोऽप्यपहृतः।

द्वितीयः—तदा तु कस्य साहाय्येन मनसि शक्तिमुपलप्स्ये ?

धनञ्जयः—ममैव शक्त्या किं युष्माकं शक्तिः ? ईदृशवाक्योच्चारणेन मामपि दुर्वलीकरोषि।

गणेशः—तेन वचनेनाद्य मा वञ्चय। एकस्मिन्नेव त्वयि अस्माकं सर्वशक्तिर्वर्तते।

धनञ्जयः—तदा तु पराजितोऽहम्। मयापि दूरं गन्तव्यम्।

सर्वे—देव, कथमेतत् ?

धनञ्जयः—मां प्राप्य आत्मानं विसर्जयिष्यसि! एतादृशीं क्षतिं पूरयितुं किमस्ति मे शक्तिः। अतोऽहं नितरां लज्जे।

प्रथमः—देव, कथमेवम् ? भवतु, यदेव त्वया आदिश्यते, तदेवास्माभिः करिष्यते।

धनञ्जयः—मां परित्यज्य गम्यताम्।

द्वितीयः—गत्वा च किं करिष्यामि ? अस्मान् विहाय स्थातुमर्हसि किम् ? किमस्मासु नास्ति ते प्रणयः ?

धनञ्जयः—स्नेहात् पेषणेन युष्माकं हननात् स्नेहेन युष्माकं परित्याग एव वरम्। गम्यतां, गम्यताम्; अलं वचनान्तरेण।

सर्वे—देव अथ किम् ? प्रचलामः; किन्तु—

धनञ्जयः—अरे, किन्त्विति किम्! सर्वथा निष्किन्तुभावेन उन्नतशीर्षेण गम्यताम्।

सर्वे—अस्तु चैतत्। तत् साधयामस्तावत्।

धनञ्जयः—किं तच्चलनमुच्यते ? सवेगं प्रचल्यताम्।

गणेशः—प्रचलामः। किन्त्वस्माकं बलबुद्धिस्त्वत्रैव परित्यक्ता।

(प्रस्थानम्)

रणजित्—अहो सन्न्यासिन्, किं चिन्तयसि ? कथं मौनमवलम्बसे ?

धनञ्जयः—राज्ञा तु वयं भावनामासादिताः।

रणजित्—अथ किंनिमित्ता भावना ?

धनञ्जयः—तव चण्डपालेन दण्डविधानेनापि यन्न सम्भावितम्, मया तु तदेव कृतमिति मन्ये। एतावत्कालं मयावगतं यन्मयैव तेषां बलबुद्धिः संवर्द्धते इति। तेषां बलबुद्धिर्मयैवाहृतेति मत्समक्षमेव तैरद्याभिहितम्।

रणजित्—केन तत् सम्भवति ?

धनञ्जयः—ते तु मया यथैव प्रोत्साहितास्तथैव न पक्वीकृताः। ऋणं येषामधिकं केवलं धावनेन ऋणं तेषां नापगतं भवति। तैश्चिन्त्यते—विधातुरप्यहं महत्तरः, तस्य सविधे तेषां यदृणं तदहं विफलीकर्तुं शक्नोमीति। अतश्चक्षुर्निमील्य मामेवालिङ्ग्य तिष्ठन्ति।

रणजित्—तैस्त्वमेव दैवतरूपेण परिगृहीतोऽसि।

धनञ्जयः—अतो मत्सकाशमेत्य निरुद्धाः सञ्जाताः, मूलदेवतां न हि सम्प्राप्तास्ते। अभ्यन्तरादेव यः खलु तान् परिचालयितुमशक्यत्, बहिर्देशात् स एव मया निरुद्धः।

रणजित्—यदा राजस्वं प्रदातुं ते आगच्छन्ति, तदा ते बाध्यन्ते; उत यदा दैवतोद्देशिनी पूजा तवैव चरणान्तिकमायाति, तदा किं तत् त्वां न बाधते !

धनञ्जयः—नूनम्, नूनमेव। कथं न वाधते? धावनेन पलायनमेव आकाङ्क्ष्यते। मामर्चयित्वा अन्तरतस्ते ऋणग्रस्ता भवन्ति, तेषाम् ऋणस्य दायभारो ममाप्युपरि निपतिष्यति। देवता तु न कदापि मुक्तिं दास्यति।

रणजित्—अधुना किं त्वया करणीयम्?

धनञ्जयः—कर्तव्यं हि अन्तरालावस्थानम्। यदि वा मयैषां सुदृढं विरचितो मनसां बन्धस्तदा हि भैरवस्ते विभूतिं माञ्च युगपद्विताडयतु।

रणजित्—तर्हि कथं पुनर्विलम्बः? गम्यतामन्तरालम्।

धनञ्जयः—मयि चान्तरालं गते ते हि तव चण्डपालस्य ग्रीवादेशे निपत्य आक्रमिष्यन्ति। तदा तु यो दण्डो मया प्राप्यः स हि तेषामेव शिरःकपालोपरि निपतिष्यति। अनयैव चिन्तया नाहमपसर्त्तुं क्षमः।

रणजित्—अपसरणे चाशक्ते त्वयि अहमेव अपसारयिष्यामि। भो उद्धव, शिविरे निरुध्यतामसौ सन्न्यासी।

(गानम्)

धनञ्जयः— शृंखलं ते नहि करिष्यति मां विकलम्,
प्रहारेण ते न खलु मरिष्यति मम मानसम्।
तदीयकरांकितं मुक्तिपत्रम्
अधितिष्ठति निगूढं
मम मानस-मर्मस्थलम्।
न च निरोत्स्यति मां युष्मत्पाशबन्धनम्॥
येन मार्गेण करोमि गतागतम्
न हि त्वत्प्रहरी लभेत तत्सन्धानम्,
सम्प्राप्तोऽहं तदीयमेव द्वारम्,
द्वारे ते रोत्स्यति मां कथम्।
त्वद्भयान्नहि शङ्कते मे हृदयम्॥

(धनञ्जयेन सह उद्धवस्य प्रस्थानम्)

रणजित्—मन्त्रिन्, वन्दिशालायामभिजितं निरीक्ष्य समागच्छ। द्रक्ष्यसि चेद् वत्स आत्मनः कृतकर्मार्थमनुतप्तस्तदा—

मन्त्री—महाराज, भवान् स्वयमेव गत्वा वारमेकम्—

रणजित्—नहि, नहि। स हि स्वराष्ट्रद्रोही; यावदात्मनोऽपराधं न

स्वीकरोति, तावदेव तस्य मुखं न द्रक्ष्यामि। अहन्तु राजधानीं प्रचलामि। तत्रैव मह्यं सन्देशं प्रेरय।

(राज्ञः प्रस्थानम्)

[भैरवपन्थिनः प्रवेशः]

(गानम्)

तिमिरहृद्विदारण
ज्वलदग्नि-निदारुण
मरुश्मशान-सञ्चर
शंकर शंकर !
वज्रघोष-वाणी
रुद्रशूलपाणे
मृत्युसिन्धु-सन्तर।
शंकर शंकर

(प्रस्थानम्)

[उद्धवस्य प्रवेशः]

उद्धवः—किमिदम्? युवराजेन सह साक्षात्कारमकृत्वैव प्रस्थितो महाराजः।

मन्त्री—मुखदर्शनेन चेत् प्रतिज्ञाभङ्गः स्यादित्येव तस्य शङ्का। मनसि द्वैधीभावमिदं संरुध्य एतावत्कालं स हि सन्न्यासिना साकमाललाप। शिविराभ्यन्तरमपि गन्तुं नाशक्नोत्, नासीच्च समर्थः शिविर-परित्यागार्थं पादक्षेपेऽपि। भवतु, गच्छामि तावत् युवराजं द्रष्टुम्।

(प्रस्थानम्)

[द्वयोः स्त्रीजनयोः प्रवेशः]

प्रथमा—मातृष्वसः, कथं ते सर्वे ईदृशाः क्रुद्धाः सञ्जाताः? तैः कथमुच्यते यद् युवराजेन अन्याय्यं कृतम्—नाहमेतद् बोद्धुं शक्नोमि, न च सोढुं शक्ता।

द्वितीया—उत्तरकूटानां ललनाऽपि त्वं नावगच्छसि? नन्दिसंकटस्य पन्थास्तत्रभवता उन्मोचितः—इत्येव क्रोधहेतुः।

प्रथमा—नाहं जाने तत्र कोऽपराध इति। किन्तु, युवराजेनान्यायः समाचरित इति नाहं विश्वसिमि।

द्वितीया—वयसा त्वं हि तरुणी। बहिरङ्गरूपेण ये खलु साधव इव दृश्यन्ते त एव भृशं सन्देहकारणमित्येकदा महता दुःखेनैव ज्ञास्यसि।

प्रथमा—किन्तु, युवराजे को हि युष्माकं सन्देहः ?

द्वितीया—शिवतलस्य नरान् वशीकृत्य अधुनैव स उत्तरकूटस्य सिंहासनं जेतुमभिलषति—स कालविलम्बं न सहते इति सर्वे वदन्ति।

प्रथमा—तस्य सिंहासनेन किं प्रयोजनम्? सर्वेषां हृदयानि तु तेन विजितानि। ये खलु तं निन्दन्ति, तेष्वेव विश्वासं स्थापमिष्यामि, न खलु युवराजे—विचित्रमेतत्!

द्वितीया—मैवम्। स्वल्पवया वालिकासि। तवैव मुखान्न शोभते ईदृशी कथा। समग्रदेशस्य विश्वे जनाः यमभिशपन्ति, अकाण्डे त्वं तस्य—

प्रथया—सर्वेषां नराणां पुरतो दण्डायमाना अहमेवं वक्तुं शक्नोमि यत्—

द्वितीया—मैवं मैवम्। तूष्णीम्भव।

प्रथमा—कथं तूष्णीं भविष्यामि? नयने मे विप्लाव्य निर्गलितुमिच्छति अश्रुधारा। युवराजे वर्तते मे सर्वाधिको विश्वास इति प्रकाशयितुं यत्-किञ्चिदपि कर्तुमिच्छामि। ममेदं दीर्घकेशभारमद्य भैरवसकाशे न्यासरूपेण रक्षिष्यामि वक्ष्यामि च—देव, त्वमेव विज्ञापय युवराजस्यैव जातो विजयः; ये खलु निन्दाकारिणस्ते तु मिथ्याचारा इति।

द्वितीया—मौनं, मौनमवलम्बस्व! कुतोऽपि कश्चिच्छृणुयात्। वालिकेयं विपदं संघटयिष्यतीति मन्ये।

(उभयस्य प्रस्थानम्)

[उत्तरकूटस्य नागरिकसंघस्य प्रवेशः]

प्रथमा—न कथमपि मोचयिष्यामि। आगम्यतां तावत्, राजसकाशं प्रचलामः।

द्वितीया—तेन किं भविष्यति? युवराजस्तु राज्ञः हृदयमणिरिव। तस्यापराधस्य विचारं कर्तुं कदापि स न शक्नुयात्, परन्त्वस्मभ्यं प्रकुपिष्यति।

प्रथमा—भवतु स कुपितः; तद्भवतु यल्ललाटे लिखितमस्ति, सत्यमेव कथयिष्यामि।

तृतीयः—परन्तु, युवराजोऽस्मभ्यमीदृशीं प्रीतिं प्रदर्शयन्ति यदाकाशात् चन्द्रमपि समानीय अस्मभ्यं दास्यतीति नाटयति ; अन्यतश्च संगोपनेन तस्येयं कीर्तिः ! अकाण्डे शिवतलं तत्सकाशे उत्तरकूटात् प्रियतरं सञ्जातम् !

द्वितीयाः—भ्रातः उच्यतां तर्हि, सति चैवं, पृथिव्यां कुत्रास्ति धर्मः ?

तृतीयाः—कमपि परिज्ञातुं नास्ति चोपायः।

प्रथमाः—राजा तं न शास्ति चेत्, तदा वयमेव तस्य दण्डं विधास्यामः।

द्वितीयः—किं करिष्यसि ?

प्रथमः—देशेऽस्मिन् तस्य स्थानं नास्ति। यः पन्थास्तेन खनितस्तेनैव पथा तेन निर्गन्तव्यम्।

तृतीयः—किन्तु, चवुयापल्लीवासिभिरुक्तम्—नाधुना स शिवतलमध्यास्ते, इदानीं राजप्रासादेऽपि न लभ्यत इति।

प्रथमः—नूनं स राज्ञा गोपितः।

तृतीयः—किं गोपितः ? भवतु, प्राकारं विदार्य बहिरानेष्यामि।

प्रथमः—गृहे अग्निं संयोज्य वहिरानेष्यामि।

तृतीयः—अस्मान् वञ्चयिष्यति ! मरणमेव नो वरं, तथापि—

[उद्धवेन सह प्रविशति मन्त्रिमहोदयः]

मन्त्री—किं जातम् ?

प्रथमः—न हि चलिष्यति चातुर्यम्। वहिरानीयतां युवराजः।

मन्त्री—अरे, वहिरानेतुं कोऽहम् ?

द्वितीयः—यूयमेव तस्मै मन्त्रणां प्रदाय तं—न हि शक्यसि त्वम्, वयमप्याकृष्य वहिरानेष्यामः।

मन्त्री—तथास्तु, गृहाण तावत् स्वहस्तेन राज्यशासनभारम्। मोच्यतां चासौ राज्ञः कारागृहात्।

तृतीयः—कारागृहात् ?

मन्त्री—महाराजेन स वन्दीकृतः।

सर्वे—विजयतां महाराजः। जयोऽस्तु उत्तरकूटानाम्।

द्वितीयः—अरे, प्रचलत तावत्। वयं कारागृहं प्रवेक्ष्यामः। तत्र प्रविश्य—

मन्त्री—प्रविश्य किं करिष्यथ ?

द्वितीयः—विभूतेः कण्ठमाल्यात् पुष्पाण्यपसार्य रज्जुन्तु तस्य कण्ठे प्रलम्बयिष्यामः ।

तृतीयः—कथं कण्ठे, हस्ते एव प्रयोक्ष्यामहे । बन्धन-निर्माण-जनित-सम्मानस्योच्छिष्टेन मार्गमोचनकरौ हस्तौ रज्जुबद्धौ भविष्यतः ।

मन्त्री—मार्गभङ्गहेतुको युवराजस्यापराधः ; युष्माभिस्तु शासनव्यवस्था विपर्यस्ता क्रियते चेत् किं नास्ति तत्रापि अपराधः ?

द्वितीयः—अहो, एषा ह्यप्रासंगिकी वार्ता । भवतु, उत्तमम् ; यदि शासन-व्यवस्था अस्माभिर्विपर्यस्ता भवति, तदा किं भविष्यति ?

मन्त्री—पदतलस्था मृत्तिका न हि रोचते इति हेतोः शून्ये उज्झम्फनं भविष्यति । तदपि न रोचिष्यते इति ब्रवीमि । प्रागेव काचित् व्यवस्था करणीया, तदनन्तरं चापरा व्यवस्था विपर्ययं नेया ।

तृतीयः—भवतु, तर्हि तिष्ठतु तावत् कारागृहम् । राजप्रासादस्य पुरतो महाराजस्य जयध्वनिमुच्चार्य आगच्छामः ।

तृतीयः—अरे भ्रातः, दृश्यताम्—अस्तं गतो भास्करः, जायते च गगनं तमसावृतम् ; विभूतेर्यन्त्रचूडा त्वधुनाऽपि देदीप्यते । मन्ये, आतपासवं निपीयेव सञ्जातं तदारक्तम् ।

द्वितीयः—अपरञ्च भैरवमन्दिरस्य त्रिशूलं संश्रित्य सन्तिष्ठते निमज्जन-भयादिव अस्तायमानं मार्कण्डरश्मिजालम् । विचित्रमेतत् ।

(नागरिकाणां प्रस्थानम्)

मन्त्री—युवराजं शिविरेऽस्मिन् निरोद्धुं कथं महाराजेन समादिष्टम्, अधुना तदवगम्यते ।

उद्धवः—कथम् ?

मन्त्री—तद्धि प्रजाभ्यस्तस्य रक्षणार्थमेव । किन्त्विदं सुष्ठु न प्रतीयते । जनानामुत्तेजना केवलमेव प्रवर्द्धते ।

[सञ्जयस्य प्रवेशः]

सञ्जयः—महाराजाय मम आग्रहस्याधिक्यं प्रदर्शयितुं साहसं न प्रादर्शयम्, तेन चेत् दृढतरो भवति तस्य संकल्पः ।

मन्त्री—राजपुत्र, शान्तो भव । मा कुरु विपदो जटिलतावर्द्धनम् ।

सञ्जयः—विद्रोहं संसृज्याहमपि वन्दीभवितुमिच्छामि ।

मन्त्री—तस्माद् वरं मुक्तः सन् बन्धनमोचनमेव चिन्तय।

सञ्जयः—तदर्थमेवाहं प्रजानां सकाशं गतवान्। मया तु ज्ञातं यत् युवराजं प्रति प्रवहति तेषां प्राणाधिका प्रीतिः ; ते न कदापि क्षमिष्यन्ते तस्य बन्धनम्। गत्वाऽहमपश्यं नन्दिसंकटस्य वार्तां संप्राप्य सञ्जातास्ते क्रोधानलेन प्रदीप्ता इति।

मन्त्री—तदा हि ज्ञायतां तावत्—बन्दिशालायामेव विपन्मुक्तो युवराज इति।

सञ्जयः—चिरमेवाहं तस्यानुगतः। अतो बन्दिशालायामेव तमनुगन्तुं प्रदीयतामनुमतिः।

मन्त्री—तेन किं भविष्यति ?

सञ्जयः—पृथिव्यां न कश्चिदेकको मनुष्यः केवलमेकः ; स तु अर्द्ध एव ; अपरेण सह संमिल्य प्राप्नोति स ऐक्यम्। युवराजेन सह ममाप्यस्ति तदेव मेलनम्।

मन्त्री—राजपुत्र, तस्य समर्थनं मया क्रियते। किन्तु, यत्र हि यथार्थतस्तत् मेलनं, तत्र अन्तिकावस्थानेन नास्ति किमपि प्रयोजनम्। आकाशस्य जलदं, समुद्रस्य च सलिलमान्तररूपेण एकमेव। अतो बहिरेव पृथग्भूत्वा ताभ्यां सार्थकीक्रियते ऐक्यम्। अद्य खलु यत्रैव नास्ति युवराजस्तत्रैव स त्वयि प्रकाशमापद्यते।

सञ्जयः—मन्त्रिन्, वचनमिदं त्वदीयमिति न प्रतीयते ; एतद्धि युवराजस्य वचनमिव प्रतिभाति।

मन्त्री—अत्र अनिलेऽपि विकीर्णां तस्य वचनम्। व्यवह्रियतेऽस्माभिरथ च विस्मर्यते यदिदं तस्य उत वा ममेति।

सञ्जयः—किन्तु, वाक्यमिदं स्मारयित्वा भवता साधु कृतम् ; दूरतस्तस्यैव कार्यं साधयामि। तन्महाराजसमीपं गच्छामि।

मन्त्री—किं साधयितुम् ?

सञ्जयः—शिवतलस्य शासनभारं प्रार्थयिष्ये।

मन्त्री—कालो ह्ययं संकटसंकुलः ; अधुना किम्—

सञ्जयः—तदर्थमेव उपयुक्तोऽयं समयः।

(उभयोः प्रस्थानम्)

[विश्वजितः प्रवेशः]

विश्वजित्—कोऽसौ ? ननु उद्धवः किम् ?

उद्धवः—आम्, खुल्लतात-महाराज ।

विश्वजित्—अन्धकारार्थमपेक्षणारतोऽहम्, किं प्राप्तं मे पत्रम् ?

उद्धवः—प्राप्तम् ।

विश्वजित्—अपि तदनुसारेण सम्पन्नं कार्यजातम् ?

उद्धवः—क्षणेनैव ज्ञातुं शक्ष्यसि । किन्तु—

विश्वजित्—मनसि संशयं मा कुरु । स्वयमेव तस्य मुक्तिप्रदाने न खलु सन्नद्धो महाराजः । किन्तु, तस्य अज्ञातभावेनापरः कोऽपि कार्यमिदं साधयति चेत् तत्रभवान् जीविष्यति ।

उद्धवः—किन्तु, स नापरः कोऽपि कदापि तस्य क्षमाभाजनं भविष्यति ।

विश्वजित्—सन्ति मम सैनिकाः । ते तु त्वां तव प्रहरिणाश्च निरुध्य नेष्यन्ति । दायभारस्तु ममैव ।

[नेपथ्ये—अग्निरग्निः ।]

उद्धवः—अरे, सर्वनाशः । कारागार-संलग्न-पाकशालायाः शिविरे विहितः अग्निसंयोगः । अस्मिन्नवसरे वलिद्वयं वहिष्करोमि तावत् ।

[कियदनन्तरमभिजितः प्रवेशः]

विश्वजित्—भोस्त्वां निरोद्धुमागतोऽस्मि । मोहनगृहं त्वया गन्तव्यम् ।

अभिजित्—मामद्य केनाप्युपायेन निरोद्धुं न शक्ष्यसि—न हि क्रोधेन, नापि स्नेहेन । युष्माभिरेव वह्निसंयोगः कृत इति युष्माभिश्चिन्त्यते ? न हि ; अग्निसंयोगोऽयं येन केन भावेन भाव्यमासीत् । अद्य कारावस्थानार्थं नास्ति मे अवकाशः ।

विश्वजित्—कथं भ्रातः, किं तव कार्यम् ?

अभिजित्—जन्मलग्नस्य ऋणं तु परिशोधनीयम् । स्रोतसः पन्था मे धात्री, तस्या बन्धनमुक्तिं सम्पादयिष्यामि ।

विश्वजित्—तदर्थं सन्त्येव भूयांसः कालाः, न हि अद्यैव ।

अभिजित्—कालोऽधुनैव समागत इति जानामि । किन्तु, स पुनः किमागमिष्यतीति न केनापि ज्ञायते ।

विश्वजित्—वयमपि तव सहयोगिनो भविष्यामः ।

अभिजित्—न हि, सर्वेषां कार्यं न कदाप्येकमेव, ममोपरि न्यस्तं यत्कार्यं तत्तु एककस्य ममैव।

विश्वजित्—शिवतलस्य ये भक्तास्तवैव कर्मणि साहाय्यार्थमपेक्षन्ते, किं तान् नाह्वयिष्यसि ?

अभिजित्—यदाह्वानं मया श्रुतं तदाह्वानं यदि तेऽपि शृणुयुस्तदा ते मदर्थं नापेक्षेरन्। मदीयाह्वानेन ते पन्थानं विस्मरिष्यन्ति।

विश्वजित्—भ्रातः, सर्वं तमसाच्छन्नं भवतीव।

अभिजित्—यत आह्वानमागतं, तस्मादालोकोऽपि आगमिष्यति।

विश्वजित्—त्वयि बाधाप्रदाने नास्ति मे पर्याप्ता शक्तिः। अन्धकारे असहायो गच्छसि, तथापि त्वामापृच्छ्य मया प्रत्यागन्तव्यम्। केवलमाश्वासवाक्यमेकमुच्चारय यत्—पुनरेव मेलनं घटिष्यते।

अभिजित्—त्वया साकं विच्छेदस्य मे नास्ति कदाप्यवकाशः—वाक्यमिदं सदैव स्मरणीयम्।

[भिन्नमार्गेणोभयोः प्रस्थानम्। धनञ्जयस्य प्रवेशः]

गानम्

अनलः सहोदरो मे, घोषयामि तव जयगानम्।
न दृष्टपूर्वं रक्तरूपं ते निगडभञ्जन-करम्।
उन्माद्यसि कस्य गीतौ गगनमभि प्रसार्य करम्
किमिव मधुरमहो आनन्दमयमिति अभय-नृत्यम्
मुह्यति ततो हृदयम्।
जन्मनः स्यात् यदावसानम् अपयास्यति चार्गलबन्धः
भवेद् भस्मीभूतं तदा कर-पाद-पाशबन्धनम्।
तदा तवाङ्गेषु भवेन्ममाङ्गरङ्गनर्तनम्
प्रशमिष्यति तापैस्तापचयो भूयादापन्मोचनम्॥ (प्रस्थानम्)

[प्रविशति वटुः]

वटुः—देव, दिवसस्तावत् शेषं गतः, समायाति च तमिस्रा।

धनञ्जयः—वत्स, वहिरालोकोपरि निर्भरशीलतैवास्माकमभ्यासः ; अतस्तिमिरे समागते सर्वमेव तिमिराच्छन्नं पश्यामः।

वटुः—भैरवस्य नृत्यमद्यैवारप्स्यते इत्यनुमितं मया, किन्तु, यन्त्रराजेन किं यन्त्रेण बद्धं तस्यापि करचरणाम् ?

धनञ्जयः—आरभते यदा भैरवस्य नृत्यं, नायाति तदुपक्रमे नेत्रपथं, निष्पत्तौ तद् गच्छति प्रकाशम् ।

वटुः—प्रभो, आश्वासं देहि, भृशं भीतोऽस्मि । जागृहि, भैरव, जागृहि । आलोको निर्वाणमाप्तः, निमज्जितश्च पन्थाः ; हे मृत्युञ्जय ; न श्रूयते हि प्रत्युत्तरम् । भयं प्रदर्श्य जहि भयं ! जागृहि, भैरव, जागृहि !

(प्रस्थानम्)

[उत्तरकूटस्य नागरिकाणां प्रवेशः]

प्रथमः—मिथ्यैव वार्ता । राजधान्याः कारागारे स नास्त्येव । गोपायितश्चासौ ।

द्वितीयः—कुत्र स गोपायते तत्तु पश्यामि ।

धनञ्जयः—न हि तात, कुत्रापि स गोपायितुं न शक्यते । पतिष्यति भित्तिका, भग्नीभविष्यति द्वारं, वहिर्विच्छुरिष्यत्यालोकरश्मिः—सर्वं च गमिष्यति प्रकाशम् ।

प्रथमः—को हि पुनश्चासौ । अकाण्डे त्रासितं मे वक्षसोऽभ्यन्तरम् ।

तृतीयः—तत्तु सुष्ठु सञ्जातम् । अस्ति केनापि प्रयोजनम् । तदुदासनिमिमं निरोधय । तं बधान ।

धनञ्जयः—यः खलु मनुष्यः आत्मसमर्पणं कृत्वैव तिष्ठति, केनोपायेन तं निरुद्धीकरिष्यसि ?

प्रथमः—त्यज्यतां साधुभावः, नास्माभिस्तानि मान्यते ।

धनञ्जयः—अमाननमेव वरम् । प्रभुः स्वयमेव करे धृत्वा युष्माभिर् मानयिष्यति । भाग्यवन्तो यूयम् । यान् खलु वराकानहं जानामि तेषां सम्माननैव हारितो गुरुदेवः । तेषां मानप्रदर्शनताडनया अहमपि देशात्ताडितः ।

प्रथमः—कस्तावत्तेषां गुरुः ?

धनञ्जयः—यस्य हस्तेन ते निगृहीताः भवन्ति, स एव ।

प्रथमः—तदा तु गुरुकृत्यं त्वय्येव चास्माभिरारब्धव्यमित्यत्र किं त्वया मन्यते ?

धनञ्जयः—वत्स, अनुमोदयामि तत्; परीक्षे तावत् यथायथ-पाठने किं शक्तिरस्ति न वेति। भवतु तस्यैव निर्णयः।

द्वितीयः—त्वमेवास्माकं युवराजमवलम्ब्य किञ्चित् चातुर्यं कृतवानित्यस्माकं सन्देहः समुदेति।

धनञ्जयः—युष्माकं युवराजो मत्तोऽपि चतुरतरः। किं सम्भवति तस्मिन् मे चातुर्यम्? मामेवावलम्ब्य प्रसरति तस्य चातुर्यम्।

द्वितीयः—अरे, श्रुतमेतत्? अस्य वाक्यस्य अस्त्येव काचित् व्यञ्जना। द्वयोर्मध्ये प्रचलति काचिन्मन्त्रणा।

प्रथमः—नोचेत् एतादृश्यां गभीरायां रजन्यां कथमत्र परिभ्रमति? युवराजं शिवतले अपसारयितुमेते चेष्टन्ते। अत्रैव तं वद्ध्वा गच्छामि। अनन्तरं संप्राप्ते तु युवराजस्य सन्धाने तेन साकं करिष्यामि विचारणाम्। भोः कुन्दन, वधानैनम्; रज्जुस्तु वर्तते तवैव सन्निकर्षे।

कुन्दनः—गृह्यतां रज्जुः। त्वमेव वधान।

द्वितीयः—अरे, किं यूयमुत्तरकूटनिवासिनः? देहि, मह्यमेव देहि। (बन्धनं विरचयन्) भोः कीदृशमनुभूयते? अथ किं ब्रवीति ते गुरुः?

धनञ्जयः—तेन सुदृढं निरुद्धोऽस्मि। न हि मोचयति चासौ विनायासम्।

[भैरवपन्थिनः प्रवेशः]

गानम्

तिमिर-हृद्-विदारण,
ज्वलदग्नि-निदारुण,
मरु-श्मशान-सञ्चर
शंकर हे शंकर!
वज्रघोषवाणी
रुद्र शूलपाणे
मृत्युसिन्धु-सन्तर
शंकर हे शंकर! (प्रस्थानम्)

कुन्दनः—तत्र पश्यतु तावत्। गोधूलेरालोकं यावदेव निर्वाणं गच्छति, अस्माकं यन्त्रचूडा तावदेव कृष्णीभवति।

प्रथमः—दिवाकाले सूर्येण साकं तेन विहिता प्रतियोगिता, इदानीं तु अन्धकारे चासौ निशीथ-कृष्णत्वं स्पर्द्धते। ननु प्रेत इव दृश्यते सः।

कुन्दनः—भ्रातः, कथं विभूतिना कीर्तिरियमनेनैव विरचिता? उत्तर-कूटस्य यस्यामेव दिशि दृष्टिं प्रेरयामि, तत्रैव तस्यावलोकनान्नास्ति निस्तारः। विकट उत्क्रोश इव तत्।

(चतुर्थ-नागरिकस्य प्रवेशः)

प्रथमः—असावाम्रकाननमनु सन्निवेशितं राजशिविरमित्यधिगता वार्ता। तत्रैव युवराजः संगोपितः।

द्वितीयः—अधुना तु बुध्यते। एतदर्थमेव सन्न्यासी अनेनैव पथा परिभ्रमति। अत्रैव स बद्धस्तिष्ठतु, इतोमध्ये सर्वं निरीक्ष्य प्रत्यागच्छामि।

(नागरिकाणां प्रस्थानम्)

गानम्

धनञ्जयः—तन्त्रबन्धनेनैव किं भविष्यति कर्मावसानं ते, गुणिन्!

हे प्रिय।

तन्त्रितवीणेव किमेव स्थास्यति पतिता, हे गुणिन्

मम प्रिय?

तेन भवति पराजयो मे, गच्छामि पराजयम्

व्यर्थं मे निखिलं तन्त्ररचनं हे गुणिन् मम प्रिय।

स्पृशति ते करपद्मं चेत् जागर्ति स्वरः,

हे गुणिन, मम प्रिय।

नोचदाहरिष्यति लज्जां धूलिपतिताम्,

हे प्रिय, मम प्रिय॥

(नागरिकाणां पुनःप्रवेशः)

प्रथमः—किमिदम्!

द्वितीयः—सर्व्वैः प्रहरिभिः साकमेव युवराजो महाराजखुल्लतातेन मोहन-गृहं नीतः। तत् किं तावदस्य तात्पर्यम्?

कुन्दनः—ननु प्रवहति तस्य शिरासु उत्तरकूटस्य रक्तधारा। यद्यत्र युव-राजस्य समुचितो विचारो न भवति, अतस्तं प्रसभं वन्दीकृत्य तत्र नीतवान्।

प्रथमः—भृशमसदृशमिदम्। अयन्तु अत्याचार एव। अस्माकं युवराजाय दण्डविधाने किं वयं न शक्ष्यामः ?

द्वितीयः—भ्रातः, अयमेवास्य समुचितः प्रतिकारः यत्—

प्रथमः—भवतु, भवतु, तेषां स हि स्वर्णखनिः—

द्वितीयः—अपरञ्च भ्रातः, किं ज्ञायते त्वया यत्तस्य गोष्ठे पञ्चविंशति-सहस्रं गावः सन्ति ?

प्रथमः—तासां सर्वा एव संख्यानुसारेण गणयित्वा कीदृशोऽन्यायः ! असह्नीयोऽन्यायः।

तृतीयः—अपरञ्च, तेषां तत्कुसुम्भक्षेत्रम्, तस्मात्तु अन्ततो गत्वा प्रतिवर्षम्—

द्वितीयः—साधु, साधु। तदेव तस्मात् प्रसभं ग्रहीतव्यम्। स हि भविष्यति तस्य समुचितो दण्डः। कित्वधुना, अनेन सन्न्यासिना किं करणीयम् ?

प्रथमः—अत्रैव तावत् अवतिष्ठतु।

(नागरिकाणां प्रस्थानम्)।

[धनञ्जयेन संगीतम्]

परित्यागेनैव किमबोध, स्थास्यति निपतितम्
समाहरिष्यति तं स यो जानाति तन्मूल्यम्।
चिन्तय तत् किमिवामूल्यरत्नम्
किं तद्धि वा धूलिभिरिष्टम्
प्रणष्टे च तस्मिन् भवेद्व्यर्थं तत्कण्ठहारग्रन्थनम्।
न ज्ञायते किमाहूयते सः ? दूतश्चा नेन वहिर्गतः।
यी मिलितैः सर्वैरवहेलितः
समादरश्च वै विवर्धितः॥
प्रीणितो यः, किं प्रेमिकप्राणाः सहिष्यन्ते तस्य वेदनम्॥

(कुन्दनस्य पुनःप्रवेशः)

कुन्दनः—देवः बन्धनं ते मोचयामि, मा गणय ममापराधम्। सपदि स्वे गृहे पलायस्व। न जाने, यदद्य रात्रौ—

धनञ्जयः—किं जाने, यदि अद्य रात्रौ आगच्छति चेदाह्वानम्; तेनैव कारणेनैव गृहपलायने नास्ति कोऽप्युपायः।

कुन्दनः—अत्र कुतस्ते चाह्वानम्?

धनञ्जयः—उत्सवस्यान्तिमे अङ्के।

कुन्दनः—शिवतलस्याधिवासी भूत्वाऽपि उत्तरकूटस्य—

धनञ्जयः—भैरवस्योत्सवे अधुना शिवतलास्याराात्रिकमेव केवलमवशिष्यते।

[नेपथ्ये—जागृहि, भैरव, जागृहि]

कुन्दनः—नैतत् शुभं मन्ये, तत् प्रचलामि।

(उभयस्य प्रस्थानम्। उत्तरकूटात् द्वयोः राजदूतयोः प्रवेशः।)

प्रथमः—अधुना कुत्र गमिष्यामि? नवसानुदेशे ये खलु छागचारणं कुर्वन्ति, तैस्तु कथितं यत्तैर्दृष्टम्—युवराज एककः अनेन पथा पश्चिमां दिशं गतवान् इति।

द्वितीयः—अद्य रात्रावेव अनुसन्धानेन स नूनमाविष्कर्तव्य इत्येव महाराजस्यादेशः।

प्रथमः—मोहन-गृहं स नीत इत्येवं वार्ता समुद्भूता। किन्तु, उन्मतताया अम्बाया वचनमाकर्ण्य स्पष्टमिव प्रतिभाति यत् यः खलु तया दृष्टः, स नो युवराजः, परन्तु, अनेनैव पथा स गतवान् इति।

द्वितीयः—किन्तु, अन्धकारेऽस्मिन् एककः स कुत्र गमिष्यतीति तन्नावगम्यते।

प्रथमः—आलोकमन्तरेण पादमेकमपि अग्रे गन्तुं वयं न शक्ष्यामः। कोट्टपालसकाशादालोकं तावत् संग्रहीष्यामि।

(उभयोः प्रस्थानम्। कस्यचन पथिकस्य प्रवेशः)

प्रथमः पथिकः—(उच्चैः शब्दापनं कृत्वा) अरे बुध—न! शम्भो—ओ. विपदि पातितोऽस्मि। अग्रतो मां परिचाल्य तेनोक्तम्—ऊर्ध्वारोहणपथमतिक्रम्य सरल-पथावलम्बनेन परिभ्रम्य मया साकं मिलितो भव। अधुना न दृश्यते कोऽपि जनः। घनान्धकारे कृष्णवर्णं तद् यन्त्रम् इङ्गितेनाह्वयति। तेन भवति मे भीतिः। क आगच्छति? कोऽसौ? कथमुत्तरं न प्रदीयते? किं बुधनस्त्वम्?

द्वितीयः पथिकः—अहं निमृकुः, दीपवाहकः। राजधान्यां निखिलायामेव निशायां प्रज्वलिष्यत्यालोकः। अतः, प्रदीपैरेव प्रयोजनम्। तत्, कोऽसि त्वम्?

प्रथमः पथिकः—अहमस्मि हुव्वाः। अभिनेतृसङ्घे मया गानं गीयते। पथि किं दृष्टं त्वया आन्दुनामधारिणः अधिकारिणो दलम्।

निमृकुः—आगच्छन्ति बहवो मनुष्याः, कमभिज्ञास्यामि?

हुव्वाः—बहुषु मनुष्येषु न खलु स गणनीयः। अस्माकमान्दुः, स खलु एकः पूर्णः पुरुषः—जनसंघट्टे कदापि स नानुसन्धातव्यः—सर्वान् अतिक्रम्य स हि प्रकाशते। भ्रातः, तस्यां मञ्जूषायां ते बहवः प्रदीपाः सन्तीति मन्ये; कृपया एकं प्रदेहि मे। गृहवासिनोऽप्यपेक्षया पथचारिणामेवालोकेन प्रयोजनमधिकतरम्।

निमृकुः—मूल्यन्तु कियत् दास्यसि?

हुव्वा—मूल्यप्रदाने मयि समर्थे चेत् त्वया साकं दर्पेणैव अकथयिष्यम्। कथं मधुरं स्वरमालपामि?

निमृकुः—यथार्थं तस्त्वं रसिकोऽसि।

(प्रस्थानम्)

हुव्वाः—प्रदीपो न प्रदत्तः। किन्तु, रसिकरूपेण परिज्ञातोऽस्मि। नैतत् खलु नगण्यम्। घनान्धकारेऽपि रसिकः खलु परिज्ञायते इत्येवं माहात्म्यम्। अहो, झिल्लीस्वनेन गगनगात्रं रहस्यमयं सञ्जातम्। किन्तु, दीपवाहकेन सह रसालापं विसर्ज्य दस्युवृत्तिरेवावलम्बिता चेत्, तदा तु प्रयोजनमसेत्स्यत्।

(कस्यचनापरपथिकस्य प्रवेशः)

पथिकः—अरे कोऽसौ?

हुव्वा—महात्मन्, कथं त्रासयसि?

पथिकः—अधुना प्रचल्यतां तावत्।

हुव्वाः—चलनार्थमेव मया बहिर्गतम्। सङ्घस्य सहयात्रिणामतिक्रम्य प्रचलने कीदृशोऽचलः सञ्जायते—इत्येतस्य तत्त्वस्य मनसि परिपाकार्थं मया प्रचेष्ट्यते।

पथिकः—सन्नद्धाः खलु सङ्घस्य जनाः, इदानीं तवैव मेलनेन यायात् पूर्णता ।

हुब्बाः—किमुच्यते त्वया ? वयन्तु त्रिमोहनावासिनः । कदभ्यासः कश्चिदस्माकमस्ति—यत् स्पष्टं वचनं विना किमप्यस्माभिर्नावगम्यते । संघस्य लोक इति कमाख्यापयसि ?

पथिकः—वयं हि चवुयाग्रामस्याधिवासिनः ; स्पष्टरूपेण शिक्षादानस्यानुशीलने वयं सुनिपुणाः । (ताडयन्) इदानीं बुध्यते किम् ?

हुब्बाः—बाढं, बुध्यते । एष एवास्य सरलार्थो यदिच्छया अनिच्छया वा नूनमेव मया गन्तव्यम् । कुत्र चलिष्यामि ? अधुना कृपया किञ्चित् कोमलेनोत्तरं देहि । आलपनस्य प्रथमाघातेनैव बुद्धिर्मे स्वच्छीभूता ।

पथिकः—शिवतलमेव गन्तव्यम् ।

हुब्बा—शिवतलम् ? अस्याममारजन्याम् ? तत्र किमभिनीयते ?

पथिकः—नन्दिसंकटस्य भग्नप्राकारस्य पुनर्निर्माणं तत्र नाटयितव्यम् ।

हुब्बा—भग्नप्राकारं मयैव निर्मास्यते ? अग्रज, यतोऽन्धकारे रूपं मे त्वया न दृश्यते, अतएव एतादृशं कठोरं वाक्यमुच्चारयसि । अहन्तु—

पथिकः—त्वं यः कोऽपि भवसि, किमस्त्येव ते हस्तद्वयम् ?

हुब्बाः—नासति किञ्चिदपि न भवति—एतदर्थमेव । न तु अनेन—

पथिकः—मुखस्य वचनेन हस्तस्य परिचयो न भवति । स्थाने भविष्यति स परिचयः ; इदानीमुत्तिष्ठ रे वराक ।

(द्वितीयपथिकस्य प्रवेशः)

द्वितीयः पथिकः—अये कङ्कर, अपरः कश्चिन्मनुष्यः सम्प्राप्तः ।

कङ्करः—कोऽसौ नरः ?

तृतीयः—जात, नाऽहं कोऽपि, लक्ष्मणोऽस्मि ; उत्तरभैरवस्य मन्दिरे घण्टां वादयामि ।

कङ्करः—साधु ; हस्ते तु शक्तिरस्ति । शिवतलमागम्यताम् ।

लक्ष्मणः—गमिष्यामि, किन्तु मन्दिरस्य घण्टाम्—

कङ्करः—देवो भैरवः स्वयमेव स्वकीयां घण्टां वादयिष्यति ।

लक्ष्मणः—कृपां कुरु, क्षमस्व माम् । पत्नी मे रोगेण पीडिता ।

कङ्करः—दूरं गते त्वयि तस्या रोगस्तु अपगतः स्यादुत वा सा पञ्चत्वं गमिष्यति। त्वयि तिष्ठत्यपि, नूनं तदेव भवेत्।

हुब्वाः—भ्रातर्लक्ष्मण, निःशब्दमनुमोदस्व। कार्येऽस्मिन् अस्त्येव विपदः सम्भावना। किन्तु, प्रतिवादेऽपि नास्ति विपदः स्वल्पता—इति कश्चिदाभासो मया सम्प्राप्तः।

कङ्करः—अमुत्र नरसिंहस्य कण्ठः श्रूयते। भो नरसिंह, किं कुशलमयी ते वार्ता ?

[कांश्चिन्मनुष्यान् संगृह्य नरसिंहस्य प्रवेशः]

नरसिंहः—पश्यतु तावत्, संगृहीतैका गोष्ठी। अपराश्च कतिपयाः गोष्ठ्यः प्रागेव प्रस्थिताः।

कङ्करः—तदा तु आगम्यताम्। पथि अपराश्च कतिचित् सम्प्राप्स्यन्ते।

गोष्ठीगतः कश्चित्—नाऽहं गमिष्यामि।

कङ्करः—कथं न गमिष्यसि ? किं जातम् ?

उक्तव्यक्तिः—किमपि न जातम् ? नाऽहं गमिष्यामि।

कङ्करः—नरसिंह, अस्य किं नाम ?

नरसिंहः—वनोयारीति-नामायम्। पद्मवीजैर्माल्यं रचयति।

कङ्करः—भवतु, अनेन सह किञ्चिदालोचयामि। उच्यतां, कथं न गमिष्यसि ?

वनीयारि—नास्ति मे प्रवृत्तिः। शिवतलाधिवासिभिः सह नास्ति मे विवादः। ते खलु नास्माकं शत्रवः।

कङ्करः—भवतु, उत वा वयमेव भवामस्तेषां शत्रवः। किन्तु तदर्थमेवास्ति किञ्चित् कर्तव्यम् ?

वनोयारिः—नाऽहमन्यायमाचरितुं शक्ष्यामि।

कङ्करः—न्यायेन साकमन्यायस्यापि चिन्तनस्य स्वातन्त्र्यं यत्र वर्तते तत्रैव अन्यायो भवति अ-न्यायः। उत्तरकूटो विशालो देशः ; तस्यांशरूपेण यत्कार्यं त्वया करणीयमस्ति, तत्र नास्ति ते किमपि करणीयम्।

वनोयारिः—उत्तरकूटमप्यतिक्रामति, अस्त्येव तादृशो महत्तरः। यथा उत्तरकूटस्तस्य अंशस्तथा शिवतलमपि।

कङ्करः—अरे नरसिंह, वितर्के प्रवृत्तोऽयं जनः। देशस्य नास्ति अस्मादपि दारुणतरा विपत्तिः।

नरसिंहः—कठिनकर्मणि नियोजिते सति वितर्कस्तु विदूरं गच्छति। अतस्तमाकृष्य नयामि।

वनोयारिः—तेन हि युष्माकं भारो भविष्यामि। न चापि भविष्यामि युष्माकं कार्यकरः।

कङ्करः—उत्तरकूटस्य भारभूतोऽसि त्वम्। त्वां परिहातुं करोम्युपायस्यानुसन्धानम्।

हुब्बाः—पितृव्य वनोयारे, यतस्त्वं सर्वं प्रविचार्य उपलब्धुमिच्छसि, तदर्थमेव ये खल्वविचार्य सर्वमवगमयन्ति, तैः साकं ते एतादृशः कलहः सञ्जायते। अतस्तेषां रीतिमायत्तीकुरु, अन्यथा स्वकीयां रीतिं विसृज्य स्थैर्यमवलम्बस्व।

वनोयारिः—का ते रीतिः?

हुब्बाः—मया गानं गीयते। तत्तु नाऽत्र शोभते; अतो मयाऽत्र स्वरो न बहिष्क्रियते। नोचेदस्मिन्नवसरे सर्वान् विमूढान् अकरिष्यम्।

कङ्करः—(वनोयारिं प्रति) इदानीं कस्ते अभिप्रायः?

वनोयारिः—नाहं पादमेकमपि चलिष्यामि।

कङ्करः—तदा तु वयमेव त्वां चालयिष्यामः। अरे, शृङ्खलय चेमम्।

हुब्बा—अग्रजोपम कङ्कर, किञ्चिद्वक्ष्यामि; मा क्रुद्धो भव। अस्य संवहनेन यादृशी शक्तिरपव्ययिता भविष्यति, तस्याः सञ्चयेन महत्तरं कार्यं साधितं स्यात्।

कङ्करः—उत्तरकूटस्य सेवायां ये खल्वनिच्छुकास्तेषां दमनमप्येकं कार्यम्, यथाकालमेतदवगम्यताम्।

हुब्बा—अस्मिन्नवसरे सर्वं मयावगतम्।

[नरसिंह-कङ्करञ्च विना इतरेषां सर्वेषां प्रस्थानम्]

नरसिंहः—अमुत्र विभूतिरागच्छति। विजयतां यन्त्रराजो विभूतिः।

[विभूतेः प्रवेशः]

कङ्करः—कार्यन्तु बहुदूरं प्रगतम्, मिलिता न खलु स्वल्पाः जनाः। किन्तु, कथं त्वमत्रैव विराजसे? त्वामेवोपलक्ष्य सर्वे चोत्सवं पालयिष्यन्ति।

विभूतिः—उत्सवे नास्ति मे प्रीतिः।

नरसिंहः—उच्यतां कथमेतत्?

विभूतिः—कीर्तिं मे खर्वीकर्तुं नन्दिसंकटस्य प्राकारभङ्गस्य सन्देशो नूनमद्यैव समागतः। प्रचलति काचित् स्पर्धा मयैव सार्धम्।

कङ्करः—यन्त्रराज, कस्येयं स्पर्धा?

विभूतिः—नेच्छामि नामोच्चारणम्, सर्वैरेव ज्ञायते। उत्तरकूटे किमधिकः समादरो भविष्यति तस्य, उत ममैव—इयमेव समस्या प्रादुर्भूता। अस्मिन्नवसरे मनो मे विचालयितुं कुतोऽपि पत्नतो दूतः समागतः। मम मुक्तधारायाः बन्धनमपि भङ्क्ष्यतीति शासनवाक्यस्य आभासोऽपि तेन प्रदत्तः—वृत्तान्तश्चैषः युष्माभिर्न ज्ञायते।

नरसिंहः—किं प्रयुक्तमेतादृशं चंडवचनम्?

कङ्करः—विभूते, किं त्वयैतत् सोढम्!

विभूतिः—न हि शोभते प्रलापस्य प्रतिवचनम्।

कङ्करः—किन्तु विभूते, किं समुचिता एतादृशी सातिशया संशयहीनता? त्वयैवोक्तं यत्—वर्तते बन्धनस्यैकस्मिन् स्थाने स्थानद्वये वा बन्धन-शैथिल्यम्। परिज्ञाते तस्य सन्धाने स्वल्पेनैव—

विभूतिः—यः खलु वेत्स्यति सन्धानम्, स इदमपि ज्ञास्यति यदुन्मोचिते तस्मिन् छिद्रे न भविष्यति तस्यापि रक्षा, प्लावनेन सपदि सोऽपि निमङ्क्ष्यति।

नरसिंहः—प्रहरि-रक्षायां किं नोचितं स्यात्?

विभूतिः—तस्य छिद्रस्यान्तिकं यमराजः स्वयमेव संरक्षति। बन्धनरक्षार्थं नास्ति काऽप्याशङ्का। इदानीं यदि निरुध्यते तन्नन्दिसंकटस्य पन्थास्तदा नावशिष्यते मे कोऽपि खेदः।

कङ्करः—त्वया तु नैतत् दुष्करम्।

विभूतिः—न हि; सन्नद्धं मे यन्त्रम्। इयमेव तत्र समस्या यत् संकीर्णः स हि गिरिपथः, स्वल्प एव जना अनायासं तत्र बाधाप्रदाने शक्ष्यन्ति।

नरसिंहः—कियतीं बाधां प्रदास्यन्ति? हन्यमानाः प्राकारं निर्मास्यामः।

विभूतिः—प्रयोजनमस्ति मृत्युवरणार्थमनेकैर्मनुष्यैः।

कङ्करः—सत्सु मारणकामिषु मरणार्थमपि न भवति नराणामभावः।

[नेपथ्ये—जागृहि, भैरव, जागृहि]

(धनञ्जयस्य प्रवेशः)

कङ्करः—पश्य तावत्, गमनोद्यगे अमङ्गलम्।

विभूतिः—सन्न्यासिन्, युष्मादृशाः साधवः एतावत्कालं यावत् भैरवं जागरयितुमशक्ताः ; परन्तु यः खलु पाषण्ड इति भवद्भिराख्यायते सोऽहमेव जागरयितुं प्रचलामि।

धनञ्जयः—तत्तु मया स्वीक्रियते ; युष्मास्वेव न्यस्तो जागरणभारः।

विभूतिः—नैतत्तु घण्टां सञ्चाल्य, आरात्रिकदीपं प्रज्वाल्य युष्मादृशै-र्देवस्य जागरणम्।

धनञ्जयः—न हि, यूयं शृंखलेन तं बद्धं करिष्यथ, शृंखलच्छेदनार्थमेव स जागरिष्यति।

विभूतिः—निगडमस्माकं न हि सरलम्, तत्रास्ति घूर्णानात् परं घूर्णानम्, ग्रन्थेः परं ग्रन्थिः।

धनञ्जयः—सर्वाधिकं दुःसाध्यं यदा भवति, तदैवागच्छति तस्य कालः।

[भैरवपन्थिनः प्रवेशः]

(गानम्)

जयतु भैरव ! जयतु शंकर
जयतु जयतु प्रलयंकर !
जयतु संशय-भेदन !
जयतु संकट-संहर !
शंकर हे शंकर।

(प्रस्थानम्)

[रणजितो मन्त्रिणश्च प्रवेशः]

मन्त्री—महाराज, शिविरं कृत्स्नमेव शून्यम्, तच्च बहुशो दग्धमेव। आसन् तत्र स्वल्पसंख्यकाः रक्षिणः ; ते तु—

रणजित्—वर्तन्तां ते यत्रैव ; कुत्रास्ते अभिजिदित्येव ज्ञातव्यम्।

कङ्करः—महाराज, अस्माभिर्युवराजाय दण्डः प्रार्थ्यते।

रणजित्—यः खलु दण्डनीयस्तस्मै दण्डप्रदाने किं मया युष्मदभिमत-मपेक्ष्यते ?

कङ्करः—अनुसन्धानेन तमप्राप्य मनसि संशयगताः प्रजाजनाः।

रणजित्—कथम् ? संशयः ! कमुपलक्ष्य ?

कङ्करः—श्रूयतां महाराजः। प्रजानां मनोभावो भवता ज्ञातव्यः। अनुसन्धाय युवराजस्य प्राप्तौ यादृशो विलम्बो भवति, तेषामधैर्यमपि तादृशमेव परिवर्धते। अतो यदा स प्राप्स्यते, तदा दण्डदाने ते महाराजस्यापेक्षां न करिष्यन्ति।

विभूतिः—महाराजस्यादेशमनपेक्ष्यैव नन्दिसंकटस्य भग्नदुर्गसंस्कारभारोऽस्माभिः स्वकीयहस्तैर्गृहीतः।

रणजित्—कथं न मम हस्ते रक्षितम् ?

विभूतिः—या खलु भवतो वंशस्यैवापकीर्तिस्तत्रास्ति भवतोऽपि गोपनसम्मतिरित्येतत् सन्देहपोषणं मनुष्याणां स्वाभाविकम्।

मन्त्री—महाराज, अद्य जनानां मनांसि एकतः आत्मश्लाघया, अन्यतश्च क्रोधेनोत्तेजितानि। अधैर्येणाद्य अधैर्यं मा मा उद्दीपय।

रणजित्—कोऽत्र दण्डायमानस्तिष्ठति ? किं धनञ्जयाख्यः सन्न्यासी ?

धनञ्जयः—तं सन्न्यासिनं महाराजः स्मरतीति पश्यामि।

रणजित्—युवराजः कुत्र, इति नूनं त्वया ज्ञायते।

धनञ्जयः—न हि महाराज, यदहं निश्चितमेव जानामि, तत्तु गोपयितुं न शक्नोमि। अतो मया विपदि निपत्यते।

रणजित्—तदा अत्रैव किं क्रियते ?

धनञ्जयः—युवराजस्य प्रकटनार्थं मया चापेक्ष्यते।

(नेपथ्ये)

[सुमन ! वत्स सुमन ! अन्धकारः सञ्जातः, सर्वम् अन्धकारावृतं भवति।]

राजा—काऽसौ ?

मन्त्री—अम्बेतिनाम्नी सैवोन्मोत्ता नारी।

[अम्बायाः प्रवेशः]

अम्बा—अहो, कुत्र सः। स तु न प्रत्यागतः।

रणजित—कथं तस्यानुसन्धानं करोषि ? सम्प्राप्ते काले स हि भैरवेण समाहूतः।

अम्बा—भैरवः किं केवलमाह्वयति ? स हि किं कदापि न प्रत्यर्पयति ? निःशब्दम् ? गभीरायां रजन्याम् ? सुमन ! सुमन !

(प्रस्थानम्)

[चरस्य प्रवेशः]

चरः—शिवतलात् समागच्छन्ति सहस्रशो जनाः ।

विभूतिः—किमिदम् ? अकस्माद्वयं तत्र गत्वा तान् निरस्त्रान् करिष्यामः—इत्येव चासीत् संकल्पः । नूनं युष्मासु कोऽपि विश्वासघातकस्तेभ्यः वार्तां प्रदत्तवान् । कङ्कर, युष्मान् कतिजनान् ऋते न कोऽपि जानाति आभ्यन्तरीयां वृत्तान्तम् । तदा तु कथमेवम्—

कङ्करः—विभूते, किम् ! किमस्मास्वपि जायते तव सन्देहः ?

विभूतिः—सन्देहो न कुत्रापि सीमितः ।

अमलः—अस्माकं गवाक्षान्तिकात् विदूरे यः खलु शैलो दृश्यते, तमुल्लङ्घ्य दूरं गन्तुं प्रबलो मे अभिलाषः।

माधवदत्तः—उन्मत्तस्येव ते वचनम्। किमपि कार्यं प्रयोजनं वा नास्ति। अकस्मान्निष्कारणं शैलमुल्लङ्घ्य, प्रचलामीति, निरर्थकमेतद् वचनम्। पर्वतो यतः प्राकारवत् समुन्नतस्तिष्ठति, अतस्तस्योल्लङ्घनं निषिद्धमेव इत्यर्थो ग्रहणीयः। अन्यथा एतादृशानि विशालानि प्रस्तराणि एकीकृत्य ईदृशेन व्यापारेण किं प्रयोजनमासीद्।

अमलः—तात, किं त्वया मन्यते असौ वारयतीति? अहं तु मन्ये—पृथिवी वाक्यं वाचयितुं न शक्नोति, अतस्तेनोपायेन सुनीले गगने हस्तमुत्क्षिप्य आह्वयतीति। ये खलु विदूरवर्तिनो गृहाभ्यन्तरमधिवसन्ति, निःसङ्गास्तेऽपि मध्याह्ने मुक्तगवाक्षपार्श्वमधितिष्ठन्तस्तमाह्वानमाकर्णयन्ति। पण्डिताः किं तन्न शृण्वन्ति?

माधवदत्तः—न ते त्वत्सदृशाः मत्ताः। ते हि श्रोतुमपि नेच्छन्ति।

अमलः—अहं तु गतदिवसे मत्सदृशं मत्तमेकं दृष्टवान्।

माधवदत्तः—किं नु सत्यमेतत्? उच्यतां, शृणोमि तत्।

अमलः—तस्य स्कन्धदेशे एका वेणुयष्टिः। यष्ट्यग्रे बद्धा चैका पोटलिका। वामहस्ते च तस्य एको घटः। पुरातनं ग्राम्यपादुकायुगलं परिधाय अनेन प्रान्तरपथेनासौ शैलाभिमुखं गच्छति स्म। अहं तमाहूय पृष्टवान्—भोः कुत्र त्वया गम्यते? तेनोक्तं—को जानाति—यत्र कुत्रापि। पृष्टं मया—कथं गच्छसि? उक्तं तेन—कार्यान्वेषणाय। भवतु तात, कार्यं किम् अन्वेषणीयम्।

माधवदत्तः—अन्वेषणीयमेव। बहवः कार्यम् अन्विष्यन्तो भ्रमन्ति।

अमलः—उत्तमम्। अहमपि तथैव कार्यमन्विष्यन् भ्रमिष्यामि।

माधवदत्तः—यदि अन्विष्य किमपि न प्राप्यते ?

अमलः—अन्वेषणेन यदि किमपि न प्राप्यते, तदा तु पुनरेव अन्वेषयिष्यामि। ततश्च, असौ ग्राम्यपादुकाधारी जनोऽपक्रान्तः। अहं तु द्वारं निकषा दण्डायमानस्तं निरीक्षमाण एव स्थितः। तत्र यत्र तु उदुम्बरवृक्षस्य अधो निर्झरिणी प्रवहति, तत्रैवासौ भूमौ यष्टिं संस्थाप्य निर्झरिणीजलेषु स्वैरं पादौ प्रक्षालितवान्। अनन्तरं पोटलिकामुन्मुच्य सक्तुं संगृह्य जलेन संमिश्र्य भक्षयितुमारब्धवान्। भोजने परिसमाप्ते पोटलिकां पुनरपि संबध्य स्कन्धमारोपितवान्। पादयोर्वसनं संकोच्य तस्य निर्झरस्य अन्तरवर्तिसलिलानि विभज्य उत्तीर्य सुष्ठु गतवान्। तेनाहम् आर्यां पितृष्वसारम् उक्तवान् यत् निर्झरसमीपम् गत्वा एकदा सक्तुं भक्षयिष्यामीति।

माधवदत्तः—तत्ते पितृष्वसा किमुक्तवती ?

अमलः—तयोक्तं त्वं निरामयो भव। तदनन्तरं त्वां तन्निर्झरान्तिकं नीत्वा सक्तुं भोजयिष्यामीति। अहो कदाहं निरामयो भविष्यामि ?

माधवदत्तः—वत्स, नास्त्यत्र विलम्बः।

अमलः—विलम्बो नास्ति ? साधु। तर्हि निरामय एवाहं प्रचलिष्यामि।

माधवदत्तः—कुत्र गमिष्यसि ?

अमलः—वक्रगतीनां निर्झराणां जले पादौ निमज्जयन् निमज्जयन् पारमुत्तीयोत्तीर्य प्रचलिष्यामि। मध्याह्ने सर्वे यदा द्वारं निरुध्य गृहे शयानाः स्थास्यन्ति, तदाहं केवलं कर्मानुसन्धानं कुर्वन् भ्रामं भ्रामं दूराद् दूरान्तरं गमिष्यामि।

माधवदत्तः—भवतु, उत्तमम्। प्रथमतस्तावत् सुस्थो भव, अनन्तरं त्वं—

अमलः—अनन्तरं मां पाण्डित्यार्जने मा उपदिशतु, तात।

माधवदत्तः—तर्हि उच्यतां, किं ते मनसि कल्पितम् ?

अमलः—अधुना किमपि मे मनसि नायाति। भवतु विचिन्त्याहं वक्ष्यामि।

माधवदत्तः—त्वं तु इत्थं यं कमपि वैदेशिकमाहूय तेन सह आलपनं मा कुरु।

अमलः—वैदेशिको मह्यं नितरां रोचते।

माधवदत्तः—यदि त्वां धृत्वा दूरं नयति ?

अमलः—तत्तु उत्तमं भवेत्। मां पुनः कोऽपि धृत्वा न नयति। सर्व एव केवलं निवेशयन्तं निरोधयन्ति।

माधवदत्तः—मम कार्यान्तरमस्ति। तेन मया गम्यते। किन्तु, शृणु वत्स, कदापि वहिर्मागच्छ।

अमलः—नाहं गमिष्यामि। अपि तु तात, पथपार्श्वस्थम् एतदेव कक्षमहं अधितिष्ठामि।

२

दधिविक्रेता—दधि! दधि! उत्तमं दधि!

अमलः—दधिविक्रेतः, दधिविक्रेतः! भो! भो! घोषः!

दधिविक्रेता—कथमाह्वयसि? किं दधि क्रेष्यसि?

अमलः—कथं क्रेष्यामि? मम हि अर्थो नास्ति।

दधिविक्रेता—कीदृशः किशोरस्त्वम्। यदि न क्रेष्यसि? तदा कथं मां विलम्बयसि?

अमलः—यदि त्वया साकं गमने मे सामर्थ्यमभविष्यत्, तदाऽहम् अगमिष्यम्।

दधिविक्रेता—मया साकम्?

अमलः—नूनम्। त्वं तु बहुदूराद्द विघोषणं कुर्वन् चलितोऽसि। तदाकर्ण्य मनो मे दूयते।

दधिविक्रेता—(वीवधं भूमौ संरक्ष्य) वत्स! त्वम् अत्र उपविश्य किं करोषि?

अमलः—वहिर्गमने भिषजा वारितोऽहम्। एषोऽहमखिलं दिवसमत्रैव उपविश्य नयामि।

दधिविक्रेता—अहो, वत्स, किं ते जातम्?

अमलः—नाहं जानामि। मया तु किमपि न पठितम्, अतो मया न ज्ञायते किं मे भूतमिति। दधिविक्रेतः, कुतस्त्वया आगम्यते?

दधिविक्रेता—अस्माकं ग्रामादेव?

अमलः—युष्माकं ग्रामः? किमतीव दूरे युष्माकं ग्रामः?

दधिविक्रेता—पञ्चचूडशैलस्य मूले एवास्माकं ग्रामः। स हि श्यामली-नद्याः पार्श्वत एव।

अमलः—पञ्चचूडशैलः, श्यामली नदी! मन्यते मया—युस्माकम् ग्रामः प्राग् दृष्ट एव। किन्तु कदा दृष्टस्तत्तु स्मर्त्तुं न शक्नोमि।

दधिविक्रेता—अपि दृष्टस्त्वया? तद्धि शैलमूलं कदापि त्वया प्राप्तम्?

अमलः—नहि, न मया कदापि तत्र गतम्। किन्तु, मन्यते, मया तु दृष्ट एव। बहुकालप्राचीनाः ये खलु विशालाः वृक्षास्तेषामेव छायायां युष्माकं ग्रामः कमपि लोहितवर्णं पन्थानमभित एव? न किम्?

दधिविक्रेता—यथार्थमुक्तं त्वया, वत्स।

अमलः—तत्र शैलसानुदेशे गावो विचरन्ति।

दधिविक्रेता—किमाश्चर्यम्। सुष्ठूक्तम्। अस्माकं ग्रामे गावो विचरन्ति, नूनं विचरन्त्येव।

अमलः—रक्ताम्बराश्च ललना नद्याः जलमुत्तोल्य शिरसि कलशान् निधाय प्रचलन्ति।

दधिविक्रेता—साधु, साधु। यथार्थमेवोक्तम्। अस्माकं घोषपल्लीनिवासिन्यो रमण्यः नद्याः जलम् उद्धृत्य नयन्तीति सत्यमेव। परं तास्तु सर्वा एव लोहितनिचोलं परिदधत इति न सत्यम्। यातु वत्स, नूनं कदापि त्वया तत्र भ्रमणार्थं गतमिति मन्ये।

अमलः—दधिविक्रेतः, सत्यमेव मया कथ्यते, मया कदापि तत्र न गतम्। किन्तु, यदा भिषङ् मे वहिर्गमनम् उपदेक्ष्यति, तदा त्वं मां युस्मद्ग्रामं नेष्यसि?

दधिविक्रेता—नेष्यामि वत्स, नूनं त्वां नेष्यामि।

अमलः—शिक्षयिष्यसि मां त्वत्सदृशं दधिविक्रयम्। त्वया यथा तथैव भाण्डदण्डं स्कन्धे निधाय तवानुरूपमेव दूरपथेन गमनम्।

दधिविक्रेता—अहो कष्टम्, कथं दधिविक्रये तव अभिलाषः? कति कति ग्रन्थान् अधीत्य त्वं पण्डितो भविष्यसि।

अमलः—नहि, नहि, नाहं कदापि पण्डितो भविष्यामि। युष्माकं लोहितरागरञ्जितं पन्थानमभितः प्राचीनवटच्छायासु या खलु घोषपल्ली, तत्पल्लीतो दधि समानीय दूराद् दूरान्तरे ग्रामाद् ग्रामान्तरे च दधि विक्रीणन्

परिभ्रमिष्यामि। येन कण्ठेन त्वम् उच्चारयसि तत्स्वरालापनं मां शिक्षय—दधि—दधि—दधि उत्तमं दधीति।

दधिविक्रेता—अहो मे दग्धं ललाटम्। स्वरोच्चयः किमेष शिक्षणीयः?

अमलः—नहि, नहि, तस्य श्रवणे मे प्रीतिरस्ति। आकाशस्य विदूरप्रान्तात्, विहगकाकलीमाकर्णयतो मनो मे यथा उदासीनं भवति, तथा अमुष्मात् पथसंयोगस्थलात् अमुं वृक्षवीथिकामतिक्रम्य यदा तव आह्वानमागतं, तदा मनसि किमपि अपूर्वभावोद्दीपनं जातम्। अधुना नाहं तत्प्रकाशयितुं क्षमोऽस्मि।

दधिविक्रेता—वत्स, दधिभाण्डमेकं गृहाण।

अमलः—मम तु अर्थो नास्ति।

दधिविक्रेता—न, न, न, न, नहि—अलमर्थेन। यदि त्वं मम दधि पिबसि, तदाहमतीव आनन्दितो भविष्यामि।

अमलः—किं भवतो महान् विलम्बः संघटितः?

दधिविक्रेता—नहि, नहि। न मे विलम्बो जातः न वा क्षतिः। दधिविक्रये कीदृशं सौख्यं, तन्मया त्वत्सकाशादधिगतम्। [प्रस्थानम्]

अमलः—(गीतस्वरेण) दधि, दधि, उत्तमं दधि। तद्धि पञ्चचूडशैलतटे श्यामलीनदीतीरवर्त्तिघोषगृहाणां दधि। ते हि प्रभातकाले वृक्षतले दण्डायमानां गां दुहन्ति, सायं घोषललना दधिरचनां कुर्वन्ति—तद् दधि, तद्धि-दधि, दधि-द-अ-धि, उत्तमं दधि।

एष प्रहरी पथि विचरति। भोः प्रहरिन्, प्रहरिन्! वारमेकम् इहागत्य श्रूयताम्। प्रहरिन्!

[प्रहरी प्रविशति]

प्रहरी—एवं कथमुच्चैः शब्दापयसि? नास्ति ते मत्सकाशात् भयम्?

अमलः—कथं? कथं त्वत्तो बिभेमि?

प्रहरी—यद्यहं त्वां धृत्वा नयामि?

अमलः—कुत्र मां नेष्यसि? किं महति व्यवधाने? अमुं गिरिशिखरम् अतिक्रम्य?

प्रहरी—यदि त्वां राजसमीपमेव नयामि?

अमलः—राजसमीपम्? नय माम्। किन्तु, चिकित्सकेनाहं वहिंगमनाद्

वारितः। अतः कोऽपि मामन्यत्र बलान्नेतुं न शक्ष्यति। मया अत्रैव केवलं रात्रिन्दिवम् अवस्थातव्यम्।

प्रहरी—चिकित्सकेन वारितोऽसि? अहो तदेव सत्यम्। मुखमण्डलं ते पाण्डुरं सञ्जातम्। नयनप्रान्ते दृश्यते कृष्णा रेखा। करयोश्च शिरागुच्छं प्रकाशं गच्छति।

अमलः—भोः। प्रहरिन्, किं त्वं घण्टां न वादयिष्यसि?

प्रहरी—इदानीमपि न जातः समयः।

अमलः—कोऽपि वदति, कालः अतिक्रामतीति। अन्ये कथयन्ति समयो नागत इति। यातु, त्वं घण्टां वादयसि चेत्तदा हि समयो भवेत्।

प्रहरी—कथं तद् भवेत्? समये समागते हि यथाकालं घण्टां वादयामि।

अमलः—मनोहारिणी तव घण्टा। श्रुतिमधुरो हि तव घण्टाध्वनिर्मम आनन्दं जनयति। द्विप्रहरे सर्वेषां भोजने परिसमाप्ते यदा हि पूजनीयः पितृष्वसृपतिः कार्यप्रसङ्गेन वहिर्गच्छति, आर्या च पितृष्वसा रामायणं पठन्ती निद्रामग्ना भवति, अस्माकं क्षुद्रको गृहसारमेयश्च अङ्गनप्रान्तच्छायायां लाङ्गूलाभ्यन्तरे मुखं संस्थाप्य सुप्तिं गच्छति, तदैव तव घण्टा निनदति ढं, ढं, ढं, ढं ढमिति। तत्कथं ते घण्टा ध्वनति।

प्रहरी—घण्टा सर्वानेवं निर्दिशति—कालः कमपि नापेक्षते, अविरामं कालो गच्छतीति।

अमलः—कालो गच्छति? कुत्र, कं देशमभिगच्छति?

प्रहरी—कोऽपि तन्न जानाति।

अमलः—किंतु तत्स्थानं न केनापि दृष्टम्? कालेन सार्धम् अहमपि तमदृष्टपूर्वं दूरदेशं गन्तुं नितराम् अभिलषामि।

प्रहरी—वत्स, स देशः सर्वैरेव नूनं गन्तव्यः।

अमलः—किं मयापि गन्तव्यः?

प्रहरी—नूनमेव।

अमलः—किन्तु, भिषङ्महोदयेन वहिर्गमने वारितोऽहम्।

प्रहरी—कदा तु वा भिषग्वरः स्वयं करे धृत्वा नयेत्।

अमलः—नहि नहि, न जानासि तं भिषजम्। स केवलं धृत्वैव रुणद्धि।

प्रहरी—तस्मादपि निपुणतरो यश्चिकित्सकः स हि मोचयति।

अमलः—स मे निपुणश्चिकित्सकः कदा नु आगमिष्यति ? उपविश्य विलम्बनं मे नाधुना रोचते।

प्रहरी—शान्तम्। वत्स, एतादृशं न वक्तव्यम्।

अमलः—नहि, अहं तु उपविष्ट एव, आसनान्न कदापि मया बहिर्गम्यते। किन्तु तवेयं घण्टा निनदति ढं ढं ढंमिति, मनश्च मे अवसीदति। यातु, प्रहरिन्!

प्रहरी—तात ?

अमलः—अमुत्र पथः पुरतो विशाले भवनशीर्षे समुड्डीना पताका, यत्र च जनाः निरन्तरमागच्छन्ति निष्क्रामन्ति च, तत्र किं घटितम् ?

प्रहरी—तत्र नूतनं वार्तागृहं प्रतिष्ठितम्।

अमलः—वार्तागृहम् ? कस्येदम्।

प्रहरी—वार्तागृहमपरस्य कस्य भवति ? एतद्धि राज्ञ एव। बालकोऽयं नूनं कौतुकमुद्दीपयति।

अमलः—राज्ञो वार्तागृहे राजसकाशात् किं सर्वाणि पत्राणि आगच्छन्ति ?

प्रहरी—नूनमागच्छन्ति। पश्य एकदा तवापि नामाङ्कितं पत्रमागमिष्यति।

अमलः—किं ममापि नाम्ना पत्रमागमिष्यति ? अहं तु किशोर एव।

प्रहरी—किशोरानुद्दिश्य राजा ईदृशं क्षुद्रं पत्रं लिखति।

अमलः—तद्धि मे प्रीतिकरं भविष्यति। कदा नु अहं पत्रं प्राप्स्यामि ? मामपि उद्दिश्य तत्र भवान् पत्रं लेखिष्यतीति कथं त्वं जानासि ?

प्रहरी—तन्नाभविष्यत् चेत्, तव उन्मुक्तगवाक्षस्य पुरत एव ईदृशीं विशालां हेमाभां पताकामुद्धूय तत्रभवता कथं वार्तागृहं प्रतिष्ठापितम् ? [स्वगतम्] इमं किशोरं प्रति मे प्रीतिः संजायते।

अमलः—भवतु, राजसकाशात् समागते मे पत्रे, कस्तदानीय मह्यं प्रदास्यति ?

प्रहरी—राज्ञस्तु वर्तन्ते बहवो वार्तावाहकाः। सुवर्णनिर्मितं सुगोलमभिज्ञानं वक्षसि सन्धार्य ते विचरन्तीति किं त्वया न दृष्टम्।

अमलः—कुत्र ते विचरन्ति ?

प्रहरी—गृहे गृहे, देशे देशे।

[स्वगतम्] अस्य प्रश्न-श्रवणे हास्यं समुत्पद्यते।

अमलः—तर्हि परिणते वयसि अहं राज्ञो वार्तावाहको भविष्यामि।

प्रहरी—हा-हा-हा-हा। वार्तावाहकः। सुमहत् तस्य कार्यम्। रौद्रे, वर्षणे, दीनानां धनिकानां च सर्वेषामेव गृहे पत्रं प्रापयतो विचरणम्! तत्तु कार्यम् आयासकरम्।

अमलः—कथं त्वं हससि? तदेव कार्यं मे सर्वाधिकं रोचते। नहि, नहि, त्वत्कार्यमपि अतीव सुन्दरम्—मध्याह्ने यदा रौद्रमतीव ज्वालामयं भवति तदा ढं, ढं, ढमिति घण्टा ध्वनति, पुनः कस्याञ्चिद् रात्रौ शय्यायाम् अकस्मात् जागरितः पश्यामि, प्रदीपो निर्वाणमाप्तः, वहिर्देशे च तदा घनान्धकारे घण्टा ध्वनति ढं ढं ढमिति।

प्रहरी—अरे। पश्य, असौ मण्डलपतिरागच्छति—तदहमधुना पलायिष्ये। यतस्त्वया सह आलपन्तं मां दृष्ट्वा स मां विपदि निपातयिष्यति।

अमलः—कुत्र मण्डलपतिः, कुत्र कुत्रासौ?

प्रहरी—अमुत्र, विदूरे तिष्ठति। मस्तके तस्य तालपत्र-निर्मितं गोलं विशालं छत्रमेकम्।

अमलः—किं स राज्ञा मण्डलपतिपदे नियुक्तः?

प्रहरी—न हि, स स्वयमेव मण्डलपतिरिव आचरति। किञ्च, यस्तस्मै मानं प्रदातुं नेच्छति, तेन सह अहर्निशम् ईदृशं स विवदते यत् सर्व एव तस्माद् विभेति। केवलं सर्वैः सह वैरमाचर्य स स्वकार्यं साधयति। यातु, अद्य तावद् गच्छामि, मे कार्यहानिः सञ्जायते। अहं श्वः प्रभाते पुनरागत्य निखिलं नगरसन्देशं त्वां श्रावयिष्यामि।

(प्रस्थानम्)

अमलः—राज्ञः सकाशात् प्रत्यहम् एकैकं पत्रं प्राप्नोमि चेत्, तदैतद् प्रशस्तं भवेत्। एतद्गवाक्षसमीपे समासीनः पठिष्यामि। किन्तु नाहं शक्नोमि पठितुम्। को मम कृते पठिष्यति? पितृष्वसा रामायणं पठति? किन्तु सा किं राजलिपि-पठने समर्था? यदि कोऽपि पठितुं न शक्नोति, तदा पत्राणि सञ्चित्य रक्षिष्यामि, पश्चात् परिणते वयसि पठिष्यामि। किन्तु वार्तावाहको यदि मां न परिजानाति?

भोः मण्डलपतिमहोदय, मण्डलपतिमहोदय, शृणु वाक्यमेकम्—

(मण्डलपतिः प्रविशति)

मण्डलपतिः—कोऽसौ! मार्गमध्ये मां समाह्वयति! वानरकल्पोऽयं कुतः समागतः?

अमलः—त्वं तु मण्डलपतिः। त्वं हि सर्वैरेव मान्यः।

मण्डलपतिः—(प्रसन्नः सन्) आम्, अथ किं, मां सर्वः सम्मानयति। नितरां सम्मानयन्ति मां सर्वे।

अमलः—राज्ञो वार्तावाहकः किं तव वचनमनुतिष्ठति ?

मण्डलपतिः—नानुतिष्ठन् स किं जीविष्यति ? हुम्, अपालयतस्तस्य का शक्तिः ?

अमलः— ममैव नाम अमल इति वार्तावाहकस्त्वया विज्ञप्तव्यः कथितव्यश्च यदहम् एतद् गवाक्षसमीपे समासीनस्तिष्ठामीति।

मण्डलपतिः—उच्यतां, कथमेतद् ?

अमलः—मम नाम्ना यदि पत्रमागच्छति—

मण्डलपतिः—तव नाम्ना पत्रम् ? कस्त्वां पत्रं लेखिष्यति ?

अमलः—यदि राजा पत्रं लिखति, तदा—

मण्डलपतिः—हा-हा, हा—हा। नायं बालकः स्वल्पाशः। हा-हा, हा—हा। राजा त्वामुद्दिश्य पत्रं लेखिष्यति ? बाढं, नूनं लेखिष्यति। यतस्त्वं तस्य परमो बान्धवः। कति दिनानि यावत् त्वया सह अदर्शनात् नरपतिः विशीर्णो भवतीति श्रूयते। नास्त्यतो विलम्बः। पत्रं तु अद्यैव श्वो वा आगमिष्यत्येव।

अमलः—मण्डलपते, कथं त्वमेवं कथयसि ? किं त्वं मामभिक्रुध्यसि ?

मण्डलपतिः—अहो त्वयि क्रुद्धो भविष्यामि। नैवं मे साहसम्। यतो राज्ञा सार्धं प्रचलति तव पत्रव्यवहारः। [स्वगतम्] माधवदत्तस्य गर्वं पश्यामि। यतस्तेन सञ्चितं किञ्चिदर्थजातम्, अतस्तस्य गृहे अधुना राजमहाराजानां कथां विना नास्ति वार्तान्तरम्, अस्तु, तं समुचितं शिक्षयिष्यामि। तद् भोः बालक ! यथा राजसकाशात् ते पत्रमागच्छति तथाहं करिष्यामि।

अमलः—नहि नहि, त्वया किमपि न करणीयम्।

मण्डलपतिः—कथं रे ? सन्देशं ते राजानमहं विज्ञापयिष्यामि। तदा तु तत्रभवान् विलम्बितुं न शक्ष्यति—युष्माकं सन्देशग्रहणार्थमिदानीमेव रक्षिणं प्रेरयिष्यति ! आश्चर्यं, दूरारोहिणी खलु माधवदत्तस्य स्पर्धा—राजा सर्वं शृणोति चेत्, तस्य शिक्षा समुचिता भविष्यति।

[प्रस्थानम्]

अमलः—का त्वमयि नूपुरनिक्वणं कुर्वती प्रचलसि ? क्षणं विलम्बस्व, प्रियभगिनि !

[बालिका प्रविश्य]

बालिका—विलम्बने मे किमस्त्यवसरः ? वेला हि प्रचलति ।

अमलः—विलम्बे नास्ति तव अभिलाषः । नास्ति ममापि अत्रोपविश्य कालक्षेपणे कापि इच्छा ।

बालिका—उषःकालस्य तारा इव त्वं प्रतिभासि । उच्यतां तावत् किं ते भूतमिति ?

अमलः किं भूतमिति मया न ज्ञायते । भिषजैव वहिर्गमनाद् वारितोऽहम् ।

बालिका—अहो, एवं चेद् वहिर्मागच्छ, भिषगादेशः पालनीयः, चापल्यं च न प्रदर्शयितव्यम्, तेन जनास्त्वां दुष्ट इति वक्ष्यन्ति । वहिर्दिशि दृष्टिं निक्षिपतस्ते मनो व्याकुलं भवति, तदहम् अर्धोन्मुक्तं द्वारं ते पूर्णं रुणध्मि ।

अमलः—मा, मा, रुन्धि—निरुद्धं ममात्र अपरं सर्वम्, केवलम् एतदेव उन्मुक्तम् । उच्यतां, कासि त्वम्—नाहं त्वां जानामि ।

बालिका—'सुधा' इति मे नाम ।

अमलः—सुधा ?

सुधा—किं त्वया न ज्ञायते यदहमत्रत्य-मालाकारिणी-कन्यकेति ?

अमलः—किं त्वया क्रियते ?

सुधा—पुष्पाण्यवचित्य पुष्पभाजनं सम्पूर्य माल्यं रचयामि । इदानीं कुसुमचयनार्थं चलामि ।

अमलः—पुष्पचयनाय गच्छसि ? एतदर्थमेव हृष्टं ते चरणयुगलम्, यावच्चलसि तावच्च नूपुरौ शब्दायेते "झम् झम् झम्" इति । यद्यहं त्वया सह गन्तुम् अशक्यम्, तदा हि यत्र दृष्टिर्न गच्छति ततः समुच्चशाखातः कुसुमानि अवचित्य तुभ्यमहम् अदास्यम् ।

सुधा—अथ किम् । कुसुमसन्देशं मत्तस्त्वमधिकं जानासि !

अमलः—जानामि । भृशं खलु जानामि । सप्तसहोदरायाश्चम्पायाः कथामहं जानामि । यदि सर्वे मह्यं मुक्तिं ददति, तदाहं गन्तुं शक्नोमि निविड-गहनाभ्यन्तरम् । यत्र मार्गो न दृश्यते, अत्रैवाहं प्रचलेयमिति मन्ये ।

सुकुमारशीर्णशाखायाः पुरोभागे, यत्र मनुयापत्नी उपोपविश्य दोलां करोति, तत्रैवाहं चम्पकरूपेण विकसितुं शक्नोमि। किं तर्हि त्वं मे पारुलनाम्नी अग्रजा भविष्यसि ?

सुधा—कीदृशी ते मतिः। कथमहं पारुलाख्या तें अग्रजा भविष्यामि ? अहं तु शशिमालिन्याः कन्या सुधा। मया तु प्रतिदिनम् एतावन्ति माल्यानि विरच्यन्ते। यद्यहं त्वमिव अत्रोपविश्य कालयापने समर्था अभविष्यम्, तदा भविष्यत् कीदृशो मे आनन्दसन्दोहः।

अमलः—तदा तु निखिलं दिनं किमकरिष्यः ?

सुधा—ममास्ति वणिग्वधूपुत्तलिका, तस्याः विवाहमदास्यम्। ममास्ति पुषीति गृहपालिता विडाली, तया सह,—यातु, अधुना गच्छाम्यहम्, अतिक्रामति वेला, विलम्बे सति पुष्पाणि न प्राप्यन्ते।

अमलः—मया साकमतः क्षणमधिकं कुरु सदालापम्। तेन मे तृप्तिः सञ्जायते।

सुधा—अथ किम्! चापल्यं मा कुरु। शिष्टो वालकः सन् स्थैर्यमवलम्ब्य अत्रैव तिष्ठ। अहमपि पुष्पचयनं समाप्य प्रत्यावर्तनपथे त्वया साकं सुखालापं कृत्वा प्रचलिष्यामि।

अमलः—पुनर्मह्यं पुष्पमेकं प्रदास्यसि ?

सुधा—मूल्येन विना कथं पुष्पं दास्यामि ? मूल्यं तु प्रदातव्यम्।

अमलः—परिणते वयसि मूल्यं ते प्रदास्यामि। कार्यमन्विष्यन्नहं निर्झरममुमुत्तीर्य गमिष्यामि—। तदा तु मूल्यं ते दास्यामि।

सुधा—उदारः कल्पः।

अमलः—त्वं तावत् पुष्पाणि प्रचित्य आगमिष्यसि ?

सुधा—आगमिष्यामि।

अमलः—आगमिष्यसि ?

सुधा—आगमिष्यामि।

अमलः—न मां विस्मरिष्यसि ? अमल इति मे नाम तव स्मरणे स्थास्यति ?

सुधा—नाहं विस्मरिष्यामि। द्रक्ष्यसि, तव नाम मनसि मे स्थास्यत्येव।

[प्रस्थानम्]

[किशोरसंघस्य प्रवेशः]

अमलः—भ्रातरः, युष्माभिः कुत्र गम्यते । वारमेकम् अत्रैव तिष्ठथ ।

किशोराः—वयं क्रीडितुं चलामः ।

अमलः—भ्रातरः, यूयं किं नामधेयां क्रीडां क्रीडिष्यथ ?

किशोराः—वयं हलकर्षणक्रीड़ाम् आचरिष्यामः ।

प्रथमः—(यष्टिं प्रदर्श्य) इदमस्माकं हलम् ।

द्वितीयः—आवां द्वौ वृषभौ भविष्यावः ।

अमलः—किमखिलं दिवसं क्रीडिष्यथ ?

किशोराः—नूनम्—अखिलमेव दि-व-स-म् ।

अमलः—अनन्तरं सन्ध्यायां नदीतीरेण गृहं प्रत्यागमिष्यथ ?

किशोराः—बाढं, सायमेव प्रत्यावर्तनं कुर्मः ।

अमलः—मम कक्षपुरोवर्तिना पथैव प्रत्यागन्तव्यम्, प्रियसुहृदः ।

किशोराः—त्वमपि बहिरागच्छ, क्रीडार्थम् आगम्यताम् ।

अमलः—भिषङ्महोदयेन बहिर्गमनं मे निषिद्धम् ।

किशोराः—भिषक् ! भिषजो निषेधस्त्वया मान्यते किम् ?

—चलत, चलत भ्रातरः, अस्माकं विलम्बो भवति ।

अमलः—नहि भ्रातरः, मम गवाक्षस्य पुरतः पथि दण्डायमानाः सन्तः क्षणं क्रीडन्तु । अहं तु तत् पश्यामि ।

किशोराः—अत्र कैरुपकरणैः क्रीडिष्यामः ।

अमलः—अत्र मम सर्वाणि क्रीडनकानि वर्तन्ते । एतानि सर्वाणि युष्माभिर्गृह्यन्ताम् । गृहाभ्यन्तरे एकाकी क्रीडितुं नोत्सहे । तिष्ठन्ति एतानि सर्वाणि धूलिधूसरितानि विक्षिप्तानि च, एतैर्मम किमपि प्रयोजनं नास्ति ।

किशोराः—अहो, अपूर्वम्, मनोहराणि क्रीडनकानि, जलयानं खल्विदम् । एषा तु जटिका वृद्धा । भ्रातः किं दृष्टः, कीदृशः सुन्दरः सैनिकः । किम् एतानि सर्वाणि त्वया अस्मभ्यं प्रदीयन्ते ? किं त्वया कष्टं नानुभूयते ?

अमलः—नहि, किमपि कष्टं मया नानुभूयते । सर्वाण्येव युष्मभ्यं प्रदीयन्ते ।

किशोराः—न पुनः प्रत्यर्पयिष्यामः ।

अमलः—नहि, प्रत्यर्पणं हि करणीयम्।

किशोराः—न कोऽपि तिरस्करिष्यति ?

अमलः—न कोऽपि, न कोऽपि तिरस्करिष्यति। अपि तु प्रत्यहं प्रभाते यूयम् एभिः क्रीडनकैर्मम द्वारस्य पुरतः किञ्चित्कालं क्रीडन्तु तावत्। किञ्च, सत्सु एतेषु पुरातनेषु भूयो नूतनानि अहमानीय दास्यामि।

किशोराः—शोभनः खलु प्रस्तावः। वयं प्रत्यहमेवात्र क्रीडिष्यामः। भो भ्रातरः, सैनिकान् तावत् सज्जीकुरुत, वयं युद्धं क्रीडिष्यामः। आग्नेयास्त्रं कुत्र प्राप्स्यामः। अहो तत्रैव वर्तते दीर्घं शरदण्डमेकं, तदेव भक्त्वा वयमाग्नेयास्त्रं निर्मामः। किन्तु, भ्रातस्त्वं सुप्तिं गच्छसीति दृश्यते।

अमलः—तथ्यमेव, निद्रा मां दृढमेव बाधते। अन्तरान्तरा कथं निद्रा मामभिभवतीति नाहं जानामि। दीर्घकालं यावदुपविष्टोऽहम्, नाहमतः परम् उपवेष्टुं शक्नोमि, पृष्ठदेशे वेदना जायते।

किशोराः—अधुना प्रहरैकमात्रः समयः। तत् कथं भवति ते निद्रावेशः ! श्रूयताम्, प्रथमप्रहरस्य घण्टा ध्वनतीति।

अमलः—सम्यगुक्तम्, एषा घण्टा ध्वनत्येव ढं ढं ढमिति, निद्रार्थं मामाह्वयति।

किशोराः—तर्हि वयमधुना गच्छामः, पुनः श्वः प्रभाते आगमिष्यामः।

अमलः—भ्रातरः, युष्माकं गमनात् प्राक् किञ्चित् पृच्छामि। युष्माभिस्तु वहिरेव स्थीयते, तत् किं राज्ञो वार्तागृहस्य वार्तावाहकान् यूयं जानीथ ?

किशोराः—वाढम्, जानीमः, सुष्ठु जानीमः।

अमलः—के तावत्ते ? कानि तेषां नामानि ?

किशोराः—वादल् इत्येकस्य पत्रवाहकस्य नाम, अपरस्य शरदिति नाम। अन्ये च बहवः सन्ति।

अमलः—यदि मन्नामाङ्कितं पत्रमायाति तदा किं ते परिज्ञातुं मां शक्नुवन्ति ?

बालकाः—कथं न शक्नुवन्ति। स्थास्यति चेत् पत्रे लिखितं ते नाम तर्हि निश्चितमेव ते परिज्ञास्यन्ति।

अमलः—श्वः प्रभाते यदा यूयम् आगमिष्यथ, तदा तेषामेकं मत्सकाशमानीय मया परिचयो विधातव्यः।

किशोराः—वाढम्, तथैव करिष्यामः।

(प्रस्थानम्)

३

[शय्यागतोऽमलः]

अमलः—तात, किमद्य गवाक्षं निकषापि नाहं गन्तुमर्हामि? किमितोऽपि भिषङ्महोदयेन वारितोऽहम्?

माधवदत्तः—तथैव, वत्स, प्रतिदिनं तत्र आसनावस्थानेन पीडा ते प्रबला सञ्जाता।

अमलः—मैवं तात, नाहं कामपि पीडामनुभवामि। परं तत्रैव स्थितोऽहम् अतीव सुस्थस्तिष्ठामि।

माधवदत्तः—तत्रैव उपविश्य त्वमस्य नगरस्य सर्वप्रान्तीयबालवृद्धैः सार्द्धं प्रीतिबन्धनं रचितवान्—मम द्वारदेशं निकषा नित्यमेव संघटते जनानां मेलन-महोत्सवः। किमेतेन कदापि शरीरं निरामयं भवति? अहो अद्य तावत्ते मुखं कीदृशं पाण्डुरं जातम्!

अमलः—तात, मन्ये, अद्य ममानुरक्त उदासीनो गवाक्षं निकषा माम् अप्राप्य प्रचलिष्यतीति।

माधवदत्तः—कस्तावत् स उदासीनः?

अमलः—सोऽसौ, यः प्रतिदिनं मत्सन्निधानमागत्य नानादिग्देशानां कथां कीर्तयति, तच्छ्रवणेन महती तृप्तिर्मे जायते।

माधवदत्तः—किन्तु, न मया कोऽपि उदासीनो ज्ञायते।

अमलः—इदानीमेव समागतस्तस्य आगमनकालः। तव चरणयोः पतित्वा प्रार्थये, यथा स मे कक्षं प्रविश्य वारमेकं तत्र उपविशेत्—तदेव तस्मै कथ्यताम्।

[उदासीनवेषेण पितामहस्य प्रवेशः]

अमलः—अये, अये उदासिन्! आगम्यताम्, मम शय्यायां क्रियताम् आसन-ग्रहणम्।

माधवदत्तः—किमिदम् ? एतत्तु.....,

पितामहः—(चक्षुर्भ्यामिङ्गितं कृत्वा) अहमुदासी।

माधवदत्तः—किं त्वं न भवसीति विचिन्त्यापि नावगच्छामि।

अमलः—उदासिन्, अस्मिन्नवसरे कुत्र त्वया गतम् ?

पितामहः—क्रौञ्चद्वीपमहं गतवान्। तस्मादिदानीमेव समागतोऽस्मि।

माधवदत्तः—क्रौञ्चद्वीपम् ?

पितामहः—अलं विस्मयेन। नाहं युष्माभिः समः। मम तु देशान्तर-गमने नास्ति व्ययलेशः। अहं यथाभिमतं गन्तुं शक्नोमि।

अमलः—(करतालिं दत्त्वा) कीदृशस्तव आनन्दसन्दोहः! निरामयं गतोऽहं तव शिष्यीकृतो भविष्यामीति, त्वया यदुक्तं, किमधुना तत् स्मर्यते, उदासिन् ?

पितामहः—नितरां स्मरामि। अपि तु भ्रमणार्थम् एतादृशान् मन्त्रान् अहं शिक्षयामि यत् समुद्रे शैले अरण्ये कुत्रापि गमने ते बाधा न भविष्यतीति।

माधवदत्तः—उन्मत्ताविव किमेवं प्रलपथः ?

पितामहः—वत्स अमल, शैलात् समुद्राद्वा नाहं भीतोऽस्मि। किन्तु, यदि अनेन ते पितृष्वसृपतिना सह भिषड्महोदयोऽपि सम्मिलितो भवति, तदा मे मन्त्राः व्यर्थतां गमिष्यन्ति।

अमलः—नहि, नहि तात, भिषड्महोदयस्तु त्वया किमपि न वक्तव्यः। अधुनाहमत्रैव शयानः स्थास्यामि, अन्यत् किमपि न करिष्यामि। किन्तु यस्मिन्नु दिवसेऽहं निरामयो भविष्यामि, तस्मिन्नेव दिवसे उदासिनो मन्त्रं गृहीत्वा दूरं प्रचलिष्यामि—शैलाः समुद्राः नद्यो वा मां निरोद्धुं न शक्ष्यन्ति।

माधवदत्तः—मैवं ब्रूहि वत्स। केवलं गमिष्यामि गमिष्यामीति न वक्तव्यम्। तच्छ्रवणेन मनो मे दूयते।

अमलः—उदासिन्, उच्यतां तावत्, क्रौञ्चद्वीपस्तु कीदृशः ?

पितामहः—अपूर्वः स देशः। स तु विहगानां देशः तत्र नास्ति कोऽपि मनुष्यः। नहि ते वाक्यमुच्चारयन्ति, न चलन्ति, गायन्तः केवलमुड्डीयन्ते।

अमलः—अहो अपूर्वम्। किं सागरोपान्ते ?

पितामहः—अथ किम्! सागरोपकूलमेव।

अमलः—सर्वे शैलाः किं सुनीलाः शोभन्ते ?

पितामहः—नीलेषु शैलशिखरेषु तेषां कुलायाः। सन्ध्यायां शैलशीर्षे अस्ताचलगामिनस्तपनस्य रश्मिषु विकीर्णेषु हरिद्वर्णाः पक्षिणः श्रेणीशस्तेषां कुलायान् प्रत्यागच्छन्ति। तदा हि नभसो रागस्य विहगानाञ्च वर्णस्य शैल-कान्तेश्च अकाण्डे भवति समन्वयः।

अमलः—शैले तावदस्ति निर्झरिणी ?

पितामहः—नूनम्, असत्यां निर्झरिण्यां ननु किं चलति ? सा हि प्रवहति यथैव विगलिता हीरकधारा। अपरञ्च, अपूर्वं तस्याः नृत्यम्। उपलखण्डान् 'ठं ठं ठं ठमिति वादयन्ती केवलं "कल्, कल्, झर्, झर्" रवेण सा हि स्रोतस्विनी सिन्धुवद्धासि आत्मानं वल्गति। कुत्रापि त्वरायापि तस्याः निरोधे कस्यापि भिषजः पितुरपि सामर्थ्यं नास्ति। यदि पक्षिणस्ते मां तुच्छं मानुषं मत्वा नापंक्तः करिष्यन्, तदाहं तां स्रोतस्विनीं निकषा तेषां सहस्रसंख्यकानां कुलायानां पार्श्वतो नीडं निर्माय समुद्रतरङ्गान् अवलोकयन् समग्रं दिवसं अयापयिष्यम्।

अमलः—पक्षीभूते मयि चेत्—

पितामहः—तदा तु महती समस्या संजनिष्यते। श्रुतं मया यत्त्वया दधिविक्रेता विज्ञप्तो यत् परिणते वयसि त्वं दधि विक्रेष्यसि इति। किन्तु पक्षिषु ते दधिविक्रयकार्यं तादृशं लाभजनकं न स्यात्। मन्ये तेन किञ्चिदिव तवार्थहानिर्भविष्यति।

माधवः—नाहमतः परं शक्नोमि। युवां मामपि उन्मादं करिष्यथ इति मन्ये। गच्छाम्यहम्।

अमलः—तात, दधिविक्रेता मे किमागतः ?

माधवदत्तः—अथ किम्। तव रुचिकरीम् उदासिनः पोटलिकां परिवहन् क्रौञ्चद्वीपस्थितानि पक्षिनीडान्युद्दिश्य उड्डयनेन तस्य उदरं न खलु पूर्यते। स तुभ्यं दधिपूर्णं पात्रमेकमुत्सृज्य प्रस्थितः। उक्तञ्च तेन यत् तेषां ग्रामे तस्य भगिनीकन्यायाः विवाहः। अतः स वंशीवादकमादेष्टुं कलमिपल्लीं गच्छति, तेन च भृशं कर्मव्यग्र इति।

अमलः—एकदा तु तेनोक्तं—मया सार्द्धं तस्य कनिष्ठभागिनेय्याः परिणयं विधास्यतीति ?

पितामहः—तर्हि महतीं समस्यां तर्कयामि।

अमलः—उक्तश्च तेन यत् सा मे समुज्ज्वला मनोरमा वधूर्भविष्यति। तस्याः नासिकायां नोलकाभरणं, शाटिका च चित्रिता रक्तवर्णा। प्रातः स्वहस्तेन कृष्णां धेनुं सन्दुह्य नवीनमृन्मयपात्रेण सफेनं दुग्धं सा मां पाययिष्यति, सायंकाले प्रदीपं प्रदर्श्य मां निकषा उपविश्य सप्तसहोदराया-श्चम्पायाः कथां कथयिष्यतीति।

पितामहः—अहो, अपूर्वम्, अपूर्वम्। वाञ्छनीया तु वधूः। अहं तावदुदासीनो जनः, ममापि लोभः सञ्जायते। तद्वत्स, नास्ति ते शङ्का-कारणम्। इदानीम् अनुष्ठीयतां विवाहः। सत्यमेतत् त्वां ब्रवीमि—तव प्रयोजने सति तस्य गृहे न कदापि स्वसृकन्याया अभावो भविष्यतीति।

माधवदत्तः—अलमलम्। नातःपरं शक्यते। (प्रस्थानम्)

अमलः—उदासिन्, पितृष्वसृपतिर्मे तु गत एव। इदानीं मां रहसि कथय, राजसकाशात् मन्नामाङ्कितं पत्रं किं वार्तागृहं सम्प्राप्तम्?

पितामहः—तत्र भवतः पत्रं तु प्रेषितं चलितमेवेति मया श्रुतम्। तत् पत्रमधुना पथि एव वर्तते।

अमल—पथि? कस्मिन् पथि? वर्षणात् निर्मलीभूते नभसि विदूरे यद्दृश्यते, तस्मिन् निविडवनमार्गे?

पितामहः—त्वया सर्वमेव ज्ञातमिति पश्यामि। अथ किम्! तत्रैव पथि वर्तते ते पत्रम्।

अमलः—उदासिन्, मया तु सर्वमेव ज्ञायते।

पितामहः—तत्तु अवगम्यते। किन्तु केनोपायेन जानासि?

अमलः—नाहं तज्जानामि। प्रत्यक्षमिव सर्वं मयि प्रतिभाति। मन्ये बहुशो मया दृष्टं सर्वम्, तत्तु अनेकदिनेभ्यः प्रागेव कदा इति नाहं स्मरामि। कथयामि किम्? अहं पश्यामि—राज्ञो वार्तावाहकः शैलशिखरादेकक एव केवलमवतरति, वामहस्ते तस्य प्रदीपः, स्कन्धे तु पत्रपेटिका। कति दिनानि, कति निशाश्च व्याप्य स केवलमवतरत्येव। गिरिपादं निकषा स्रोतस्विन्याः पन्थाः यत्र शेषं गतः वंकिमनदीमार्गेण—स केवलमायात्येव। यत्र पर्वत-पादमूले निर्झरगति विंलुप्तिं गता तत्र नद्यास्तीरे नीवारक्षेत्रम्—क्षेत्राभ्यन्तरे यः खलु संकीर्णः पन्थास्तेनैव पथा स केवलमागच्छति—ततस्तु इक्षुक्षेत्रम्, तस्य क्षेत्रस्य पार्श्वतो गच्छति समुच्चा संकीर्णा पथरेखा—तेनैव मार्गेण स केवलम्

आयाति—अहर्निशम् एकल एव आयाति क्षेत्रमध्ये रणन्ति झिल्लीकीटाः—नदीतीरे नास्ति कोऽपि मनुष्यः, केवलं पङ्कखनकः पुच्छमान्दोलयन् परिभ्रमति—अहं सर्वमेव पश्यामि। एवम् अन्तिकमायान्तं तं वीक्षमाणस्य मम वक्षसि समुल्लसति आनन्दसन्दोहः।

पितामहः—नास्ति मे तादृशी नवीना दृष्टिः। तथापि तव दृष्टिमाहात्म्यात् अहमपि अवलोकितुं शक्नोमि।

अमलः—भवतु उदासिन्, यस्येदं वार्तागृहम्, अपि नाम जानासि तं राजानम्?

पितामहः—नूनं जानामि। मया तु प्रत्यहमेव भिक्षार्थं तत्समीपं गम्यते।

अमलः—साधु। निरामयः सन् अहमपि तत्सकाशं भिक्षार्थं गमिष्यामि। किं गन्तुं न शक्ष्यामि?

पितामहः—वत्स, नास्ति प्रयोजनं ते भिक्षाकार्येण। तुभ्यं यत् प्रदेयम्, याच्ञां विनैव स तत् प्रदास्यति।

अमलः—नहि, नहि, तस्य द्वारस्य पुरतः पथि पार्श्वे दण्डायमानः सन् 'जयोऽस्तु" इत्युच्चरन्नहं भिक्षां प्रार्थयिष्ये—खञ्जनिं वादयित्वा नर्तिष्यामि—तत्तु सुष्ठु भविष्यति, न किम्?

पितामहः—वाढम्, नितरां शोभनं भविष्यति। मया साकं त्वां नयामि चेत् ममापि भविष्यति पर्याप्तो भिक्षालाभः। तत् त्वं किं याचिष्यसे?

अमलः—अहं वक्ष्यामि—राजन्, मां भवतः पत्रवहनकर्मणि कृपया नियोजयतु। तर्हि, करे प्रदीपं धारयन् गृहाद् गृहान्तरं तव पत्रं प्रापयन्नहं भ्रमिष्यामि। शृणु उदासिन्, मां कश्चिदुक्तवान्, यन्मयि निरामये सञ्जाते स मां भिक्षाटनं शिक्षयिष्यति। अतोऽहं तेन सह यथेच्छं भिक्षया विहरिष्यामि।

पितामहः—कथ्यताम्; कोऽसौ?

अमलः—छिदाम।

पितामहः—को नु छिदाम।

अमलः—योऽसौ अन्धः खञ्जश्च स एव। स प्रत्यहं मे गवाक्षान्तिकम् आगच्छति। मत्सदृशः कश्चित् किशोरस्तं चक्रयानेन परिभ्रामयति। मयोक्तं सुस्थःसन्नहं तं चालयन् सर्वत्र नेष्यामीति।

पितामहः—तेन नितरामानन्दो भविष्यति।

अमलः—किञ्च, स एव मामुक्तवान्, केन विधिना भिक्षा करणीया तत् स मां शिक्षयिष्यति। तस्मै भिक्षाप्रदानार्थम् अहं तातमनुरुणध्मि। तत्र भवान् ब्रवीति स मिथ्या-काणः, मिथ्या-खञ्जः, न तु यथार्थतो विकलाङ्गः। भवतु स मिथ्या-काणः, किन्तु दृष्टिहीनः स द्रष्टुं न शक्नोति—एतत्तु सत्यमेव।

पितामहः—यथार्थमुक्तं, वत्स। ननु एतदेव सत्यं यत् स चक्षुर्भ्यां द्रष्टुं न शक्नोति। तं तावत् कोऽपि काणं वदतु न वा, किन्तु यद्यपि भिक्षां न प्राप्नोति, तथाप्यसौ किं कर्त्तुं त्वत्सकाशे उपविशति?

अमलः—कुत्र किं विद्यते तदहं तं श्रावयामि। मन्दभाग्यो वराको द्रष्टुं न शक्नोति। त्वं येषां देशानां वृत्तं मह्यं वर्णयसि,तत् सर्वमहं तं श्रावयामि। तस्मिन् दिवसे भवता यत्तत् लघु-देशकथां कथितवान्—यस्मिन् देशे द्रव्याणां कोऽपि भारो नास्ति, यत्र च लघुप्लुत्या अनायासेनैव पर्वतमतिक्रम्य गन्तुं शक्यते, मन्मुखात् त्वद्वर्णितस्य तस्य लघुदेशस्य कथां श्रुत्वा स भृशम् आनन्दितोऽभवत्। भवतु, उदासिन्, केन पथा स देशो गन्तव्यः?

पितामहः—अस्त्येव अभ्यन्तरे कश्चित् पन्थाः किन्तु तस्य मार्गणं दुष्कर-मेव।

अमलः—असौ मन्दभाग्यस्तु अन्ध एव। सम्भवतः किमपि द्रष्टुं न शक्ष्यति—केवलं भिक्षाटनमेव तेन करणीयम्। एतद् विचिन्त्यासौ विषाद-मापन्नः—अहं तमुक्तवान्, भिक्षार्थं गत्वा त्वं यावत् विस्तरशो भ्रमणसुयोगान् प्राप्नोषि, सर्वे तु तदपि न प्राप्नुवन्ति।

पितामहः—वत्स, गृहावस्थाने कुतस्ते एतादृशं दुःखम्?

अमलः—न, न, नास्ति दुःखम्। प्रागेव यदहं गृहमध्ये निरुद्धस्तदा मया अमन्यत यन्नास्ति दिवसस्य अवसानम्। किन्तु अस्माकं राज्ञो वार्ता-गृहं निरीक्ष्य प्रत्यहमेवाधुना प्रसादमनुभवामि। अत्र उपविशन्तं मामियमेव कल्पना आनन्दयति यत् कस्मिंश्चिद् दिवसे मत्कृते पत्रम् आगमिष्यतीति—एवं विचिन्त्य नितरां प्रमोदितः सन् मौनमवस्थातुं पारयामि।

किन्तु राज्ञः पत्रे किं लिखितं स्थास्यतीति मया न ज्ञायते।

पितामहः—मैतत् ज्ञातमस्तु। तव नाम तु नूनमेव लिखितं स्थास्यति, एतेनैवालम्।

[माधवदत्तस्य प्रवेशः]

माधवदत्तः—उच्यतां भोः, युवां द्वौ सम्मिलितौ भूत्वा कामिमां विपदं संघटितवन्तौ ?

पितामहः—कथम् ? किं संघटितम् ?

माधवदत्तः—श्रुतं मया, युष्माभिः प्रचारितमेतत् यद् राजा युष्मभ्यं पत्रं प्रेषयितुं वार्तागृहं स्थापितवानिति ।

पितामहः—तेन किं जातम् ?

माधवदत्तः—अस्माकं मण्डलपतिः पञ्चाननस्तत्सन्देशं राज्ञे निवेद्य नासूचितं पत्रं लिखितवान् ।

पितामहः—सर्वे सन्देशाः राज्ञः श्रुतिपथम् अधिगच्छन्ति इति किमस्माभिर्न ज्ञायते ।

माधवदत्तः—तत् कथं न तूष्णीं भवसि, राजमहाराजानां नाम्ना कथं यदृच्छया एतादृशं वचनमुच्चारयसि ? यूयं मामपि विपन्नं करिष्यथ इति पश्यामि ।

अमलः—उदासिन, किं राजा कोपं करिष्यति ?

पितामहः—कथं क्रुद्धो भविष्यति, कीदृशं कोपं गमिष्यतीति पश्यामि । मत्सदृशमुदासिनं त्वत्सदृशञ्च किशोरं प्रति कोपमवलम्ब्य स कथं राजत्वं नाटयिष्यति तत्तु पश्यामि ।

अमलः—उदासिन्, पश्य, अद्य प्रातरेवारभ्य मम नेत्रयोः समक्षम् अन्त-रान्तरम् अन्धकारो घनीभूतो भवति । मन्ये, सर्वः स्वप्नः एव । प्राकाम्येण च मौनमवलम्ब्य स्थातुमिच्छामि । वाक्योच्चारणमपि नेच्छामि । तर्हि राज्ञः पत्रं किं नागमिष्यति ? इदानीमेव यदि एतद् गृहम् अन्यानि च सर्वाणि विलुप्तिं गच्छन्ति तदा—

पितामहः—(अमलमुपवीज्य) मैवम् । पत्रमद्यैव आगमिष्यति ।

(भिषजः प्रवेशः)

भिषक्—अद्य कीदृशम् अनुभूयते ?

अमलः—भिषङ्महोदय, अद्य खलु परिपूर्णं कल्यमनुभूयते, मन्ये अपगताः सर्वाः वेदनाः ।

भिषक्—(जनान्तिकं माधवं प्रति) एतत् हास्यं, न तु समीचीनं मन्ये ।

अमुना यदुच्यते, सुस्थतानुभूयते इति तदेव दुर्लक्षणम्। अस्माकं चक्रधरेणोच्यते—

माधवदत्तः—क्षमस्व, भिषङ्महोदयः, तिष्ठतु तावत् चक्रधरदत्तस्य उक्तिः। उच्यतामिदानीं को हि व्यापारः।

भिषक्—मन्ये, नातः परमिमं जीवयितुं शक्ष्यामि। मया तु निषेधो विज्ञापितः। किन्तु, मन्ये, वहिर्देशात्, वायुरिमं स्पृष्टवानिति।

माधवदत्तः—न हि भिषङ्महोदय, नैतत् सत्यम्। अहं तु चतुर्दिग्भ्यो ऽर्गलया निरुध्य इमं संरक्षितवान्। अस्य वहिर्गमनं मया सर्वथा प्रतिरुद्धम्—द्वारमपि प्रायशो निरुद्धमेव रक्ष्यते।

भिषक्—अकान्डे खल्वद्य कीदृशः कश्चित् वायुप्रवाहोऽनुभूयते। युष्माकं गोपुरद्वारस्य अभ्यन्तरे प्रवलो वायुः हु-हु-रवेण प्रवहतीति मया दृष्टम्। तन्न कदापि समीचीनम्। तद्द्वारं सम्यग् अर्गलावद्धं क्रियताम्। उत, दिवसद्वयं त्रयं वा भवत्वत्र निरुद्धं जनानां गमनागमनम्। यदि कोऽपि आगच्छति, तदा तु तदर्थं पश्चाद्द्वारमस्ति। गवाक्षेणामुना सूर्यास्तस्य या खलु आभा आयाति, सापि निरुध्यताम्। सा तु रोगिणं जागरयति।

माधवदत्तः—अमलश्चक्षुषी निमील्य तिष्ठति, मन्ये असौ निद्राति। अस्य मुखमवलोक्य, मन्ये, भिषङ्महोदय, यो न खलु स्वकीयस्तमहम् स्वभवनमानीय स्थापितवान्, स्नेहेन च पालितवान्। मन्ये अतः परं तमहं रक्षितुं न शक्ष्यामि।

भिषक्—किमिदम्! मन्डलपतिस्तवैव गृहमागच्छति। कोऽयं विपत्पातः। तद् भ्रातः, अहं प्रचलामि। किन्तु त्वम् अधुनैव सम्यग् द्वारं निरुन्धि। अहं गृहं गत्वा अचिरेणैव विषवटिकामेकां प्रेषयामि, सैव प्रयोक्तव्या। रक्षणीये सति सा एव रक्षितुं शक्ष्यति।

[माधवदत्तस्य भिषजश्च प्रस्थानम्]

[मण्डलपतेः प्रवेशः]

मण्डलपतिः—रे अर्भक, किम्?

पितामहः—(तूर्णमुत्थाय दण्डायमानं सन्) अहो, अहो, मौनं, मौनमवलम्बस्व।

अमलः—न हि उदासिन, अहं स्वपिमीति त्वं मन्यसे, नाहं सुप्तः। मया सर्वमेव श्रूयते। अहं तु विदूरस्य कथनं शृणोमीव। मम जननी तातश्च शय्याशीर्षे मे आलपत इव भाति।

(माधवदत्तस्य प्रवेशः)

मण्डलपतिः—भोः माधवदत्त, अद्यत्वे तु अतिप्रख्यातैर्महद्भिर् लोकैः सह युष्माकं सम्बन्धो दृश्यते।

माधवदत्तः—किमुच्यते भवता, महात्मन्, अलमनेन परिहासेन। वयं नितरां नगण्यजनाः!

मण्डलपतिः—युष्माकमयं किशोरस्तु राज्ञः पत्रमपेक्षते।

माधवदत्तः—एवं बोधहीनश्चासौ बालकः, तस्य वचनं किं ग्रहणीयम्?

मण्डलपतिः—नहि, नहि, किमत्र विस्मयकारणम्? युष्मद्सदृशम् ईदृशं सुयोग्यं गृहं राजा तु कुत्र प्राप्स्यति? तदर्थमेव युष्माकं गवाक्षस्य पुरत एव राज्ञो नूतनं वार्तागृहं प्रतिष्ठितमिति किं न दृश्यते? अरे, अर्भक, राजसकाशात् तव नामाङ्कितं पत्रं तु आगतमेव।

अमलः—(चकितः सन्) सत्यम्?

मण्डलपतिः—किमेतत् मिथ्या भवति? त्वयैव साकं राज्ञो बन्धुत्वम्—(अक्षरशून्यं किञ्चित् पत्रं प्रदाय) हा, हा, हा, एतदेव तत्रभवतः पत्रम्?

अमलः—मा मामुपहस। उदासिन्, उदासिन्, त्वमेव कथय किमिदं तत्रभवतः पत्रम्?

पितामहः—वाढं वत्स, अहमुदासी त्वां ब्रवीमि, तस्यैव पत्रमिदं सत्यमेव।

अमलः—परमहमत्र किमपि न पश्यामि। नेत्राभ्यामद्य सर्वं शुभ्रमेव पश्यामि। मण्डलपतिमहोदय, उच्यतामस्मिन् पत्रे किं लिखितमिति।

मण्डलपतिः—राज्ञा लिखितम्, अद्य श्वो वा युष्माकं गृहं मयागम्यते, मदर्थं युष्माकं सुमिष्टभर्जिततण्डुलैः लाजैश्च भोज्यं प्रस्तूय संरक्ष्यताम्। राजभवनम् अधुना मे क्षणमपि न रोचते। हा, हा, हा, हा।

माधवदत्तः—(कपोतहस्तं विधाय) महात्मन्, क्षम्यताम्, एभिर्वचनैः परिहासो न हि करणीयः।

पितामहः—परिहासः? कस्य परिहासः? परिहसितुं किं तत्रभवतः शक्तिरस्ति?

माधवदत्तः—भोः पितामह, किं त्वमपि मत्ततां गच्छसि ?

पितामहः—वाढं क्षिप्तोऽहम्, तेनैव अस्मिन् सर्वशुभ्रे पत्रे अक्षराणि पश्यामि। राज्ञा लिखितम्, तत्र भवान् स्वयमेव अमलं द्रष्टुमागच्छति। तस्य राजवैद्यमपि सहैव आनयतीति।

अमलः—उदासिन्, तस्य वाद्यं ध्वनति, किं न श्रूयते ?

मण्डलपतिः—हा हा हा हा। किञ्चिदधिकतरां क्षिप्ततामगच्छन् तत्र भवान् न श्रोष्यति।

अमलः—मण्डलपतिमहोदय, मया तु अनुमितं, त्वं मां प्रति कुपितः—त्वं मयि न स्निह्यसीति। त्वं सत्यमेव राज्ञः पत्रमानेष्यसीति मया न चिन्तितम्। अतः क्षम्यतां, देहि मे तव पादरजांसि।

मण्डलपतिः—यातु, अस्य बालकस्य श्रद्धा भक्तिश्च वर्तेते। यद्यपि नास्ति तस्य बुद्धिस्तथापि तस्य मनस्तु निर्मलमेव।

अमलः—व्यतीतं तु प्रहरचतुष्टयमिति मन्ये। शृणोमि तावत् ढं, ढं, ढं ढमिति। किन्तु उदासिन्, सन्ध्याताराः किमुदयं गताः। तत्तु कथमहं द्रष्टुं न शक्नोमि ?

पितामहः—ते तु गवाक्षं रुद्धं कृतवन्तः, अहं तावदुन्मोचयामि।

(वहिर्देशे द्वारे कराघातः)

माधवदत्तः—किमिदम्! कोऽसौ ? कोऽयमुत्पातः ?

वहिर्देशात्—द्वारमुन्मोचय।

माधवदत्तः—के यूयम् ?

वहिर्देशात्—द्वारमुन्मोचय।

माधवदत्तः—मण्डलपतिमहोदय, किं नायं दस्युसमागमः ?

मण्डलपतिः—रे, रे, के यूयम् ? मण्डलपतिः पञ्चाननोऽहम्। युष्माकं मनसि किं भीतिर्नास्ति ? पश्यतु तावत् शब्दः स्तब्धीभूतः। श्रुते पञ्चाननस्य कण्ठस्वरे नास्ति रक्षा, यथा तथा शक्तिशाली दस्युर्भवतु वा।

माधवदत्तः—(गवाक्षपथे मुखं वहिः प्रसारयन्) द्वारं हि भग्नम्, अतो नाधुना शब्दः।

(राजदूतस्य प्रवेशः)

राजदूतः—अद्यैव महाराजः समागमिष्यति।

मण्डलपतिः—कोऽयं सर्वनाशः ।

अमलः—कियद् गभीरायां रजन्यामसौ आगमिष्यति ।

अमलः—यदा मे बान्धवः प्रहरी नगरसिंहद्वारस्य घण्टां वादयिष्यति ढं, ढं, ढं......तदा ?

दूतः—वाढं, तदैव । राज्ञा किशोरबान्धवस्य दर्शनार्थं तस्य निपुणतमो भिषक्प्रधानः प्रेषितः ।

[राजवैद्यस्य प्रवेशः]

राजवैद्यः—किमिदम् । चतुर्दिक्षु सर्वमेव रुद्धम् । मोचय ! मोचय ! यानि यानि द्वाराणि गवाक्षाणि च विद्यन्ते, तानि सर्वाणि उन्मोचय ।

(अमलस्य गात्रं हस्तेन परामृश्य)

वत्स, कीदृशमनुभूयते ?

अमलः—अत्युत्तमम्, अत्युत्तमम्, भिषङ्महोदय, अधुना नास्ति मे कापि पीडा, नास्ति कापि व्यथा । अहो सर्वम्—उन्मुक्तम्—सर्वानेव तारागणान् पश्यामि । तमसः परस्तात् शोभमाना निखिला नक्षत्रमण्डली मया दृश्यते ।

राजवैद्यः—अर्धरात्रे यदा राजा आगमिष्यति, तदा त्वं शयनात् समुत्थाय, तेन सार्धं वहिर्गन्तुं किं शक्ष्यसि ?

अमलः—अलमलमहं शक्ष्यामि । वहिंगमनेनाहं जीविष्यामि । अहं राजानं निवेदयिष्यामि—तिमिराच्छन्नेऽस्मिन्नाकाशे ध्रुवतारां मां प्रदर्शयतु, मन्ये कतिवारानहं तां तारां दृष्टवान्, का हि सेति नाभिजानामि ।

राजवैद्यः—तत्र भवान् सर्वाण्येव परिज्ञापयिष्यति (माधवं प्रति) कक्षमिदं राज्ञः प्रत्युद्गमनार्थं परिष्कृत्य पुष्पैः सज्जीक्रियताम् । (मण्डलपतिं निर्दिश्य) कक्षेऽस्मिन्नसौ जनो न कदापि रक्षणीयः ।

अमलः—नहि, नहि, भिषग्वर्य, स मे बान्धवः, यूयं यदा नागतास्तदा तेनैव राज्ञः पत्रमानीय मह्यं प्रदत्तम् ।

राजवैद्यः—भवतु वत्स, यतोऽयं ते बान्धवस्तदासावपि कक्षेऽस्मिन् तिष्ठतु ।

माधवदत्तः—(अमलस्य कर्णे) वत्स, राजा त्वयि स्निह्यति, तत्रभवान् स्वयमद्य आगमिष्यति—अद्य तत्सकाशे किञ्चित् प्रार्थयितव्यम् । अस्माकमवस्था तु नहि समीचीना । सर्वं त्वया ज्ञातमेव ।

अमलः—तन्मया स्थिरीकृतम्, तात, अस्मिन् विषये नास्ति ते किमपि चिन्ताकारणम् ।

माधवदत्तः—तत् किं स्थिरीकृतं वत्स ?

अमलः—अहं तत्रभवतः समीपे प्रार्थयिष्ये, तत्रभवान् मां तस्य वार्तागृहस्य वार्तावाहकं करोतु । अहं देशाद्देशान्तरं गृहाद् गृहान्तरं तत्रभवतः पत्राणि प्रापयन् विचरिष्यामि ।

माधवदत्तः—(ललाटे कराघातं कृत्वा) हन्त मे दौभार्ग्यम् !

अमलः—तात, राजा आगमिष्यति, तदर्थं किं भोज्यं विरचिष्यसि ?

दूतः—तत्रभवता तु उक्तमेव, युस्माकमत्र भर्जिततण्डुलैः सगुडलाजैश्च तत्रभवता भोज्यं प्रकल्पितम् ।

अमलः—भर्जिततण्डुलम् ? सगुडलाजादिकम् ? मण्डलपतिमहोदय, त्वया(?) एतदेव प्रागेवोक्तम् यद् राज्ञः सर्वमेव वृत्तं त्वयैव ज्ञायते । प्राक् किञ्चिदपि नास्माभिः परिज्ञातम् ।

मण्डलपतिः—यदि मम गृहे कमपि जनं प्रेरयसि, तदा तु राज्ञे किञ्चि-दुत्तमम्—

राजवैद्यः—अलं तेन । नास्ति किमपि प्रयोजनम् । इदानीं यूयं सर्वे स्थिरीभवत । आयाति, आयाति, तस्य सुप्तिः समायाति । बालकस्य शयनोपान्ते अहमुपविशामि—अस्य निद्रावेशो भवति । प्रदीपस्य आलोकं निर्वापय । अधुना आकाशस्य तारकासकाशादागच्छतु आलोकः । अयं हि निद्राविष्टः ।

माधवदत्तः—(पितामहं प्रति) पितामह, कथं त्वमित्थं मूर्तिरिव कृताञ्जलिर्मौनमवलम्बसे ? कीदृशी शङ्का मे जायते । किमेतानि दृश्यमानानि सुलक्षणानि ? कथमेते कक्षं मे तमसाच्छन्नं कुर्वन्ति ? तारकालोकेन किं मे प्रयोजनम् ?

पितामहः—अविश्वासिन्, तूष्णीं भव । मा वाक्यमुच्चारय ।

[सुधायाः प्रवेशः]

सुधा—अमल ।

राजवैद्यः—सुप्तिं गतश्चैषः ।

सुधा—मया तु तदर्थं कुसुमनिकरमानीतम्। किं तस्य करतले उपहर्तुं न शक्ष्यामि ?

राजवैद्यः—वाढं, प्रदीयन्तां कुसुमानि।

सुधा—कदायं जागरिष्यति ?

राजवैद्यः—अधुनैव। यदा हि राजा समागत्य तम् आह्वयिष्यति, तदैव।

सुधा—तदा किं यूयम् अस्य कर्णौ वचनमेकमुच्चैरुच्चारयिष्यथ ?

राजवैद्यः—किं वक्ष्यामि ?

सुधा—उच्यतां यत्—"सुधा त्वां न विस्मृतवतीति"।

रवीन्द्रजन्मशतवार्षिकीसमुत्सवे "वार्तागृह"स्याभिनये अन्तिमदृश्यम् । वामत :— ड: अशो.कचट्टोपाध्याय: (पितामह:)
ड: विमलकृष्ण मतिलाल: (मण्डलपति:), ड: ध्यानेशनारायण चक्रवर्ती (राजकविराज:),
अध्यापक: श्रीरवीन्द्रनाथ भट्टाचार्य: (माधवदत्त:) ।
शय्यागता— श्रीमती नन्दिनी साधु (अमल:)

LIST OF PARTICIPANTS

On stage in different places and in All India Radio, Calcutta. 23rd May, 1961—University Institute Hall, Tagore Cent. Citizen's Conf. ; Subsequent staging :—1st July, 1961—26th Session All India Sanskrit Sahitya Sammelan 16th Sept. 1962—46th Anniversary and on many other occasions.

Prof, Dr. Govindagopal Mukhopadhyaya
,, ,, Siddheswar Chattopadhyaya
Sri Brajendra Kishore Bhattacharya (Now deceased)
Pt. Madhusudan Kavyatirtha
Prafulla Pal (Now deceased)
Prof. Dr. Heramba Chattopadhyaya
Prof. Rabindranath Bhattacharya
,, Dr. Gopikamohan Bhattacharya (Now deceased)
,, ,, Asoke Chattopadhyaya
,, ,, Satya Ranjan Bandyopadhyaya
,, Sri Saktiprasad Mukhopadhyaya I.R.S
Prof. Dr. Bimalkrishna Matilal (Now at Oxford)
Prof. Dr. Pratap Bandyopadhya
Prof. Prabhash Phadikar (Now Honourable Minister)
Prof. Dr. Ramaprasad Bhattacharya
Prof. Dr. Manabendu Bandyopadhyaya
,, ,, Dipak Ghosh
,, ,, Dipak Chattopadhyaya
Sri Chiranjeev Bhattacharya
,, Mihir Bhattacharya
,, Shyamal Chakrabarti
,, Ranjan Chattopadhyya
,, Devabrata Mitra
,, Subrata Mitra
,, Basudev Bhattacharya
&
Sm. Madhuri Mukhopadhyaya (Now deceased)
Prof. Krishna Sadhu
Prof. Jayatri Sanyal
Sm. Nandini Sadhu
Sm. Sudhakshina Mukhopadhyaya

Sm. Rupalekha Basu
Sm. Hena Mazumdar
&
Prof. Dr. Dhyanesh Narayan Chakrabarti

Advisers—Ācārya Dr. Gaurinath Shastri, Prof. Dr. Kalikumar Datta, Sm. Srimati Tagore. (Now deceased)